२३२/ख

रत्नतरङ्गिणीव्याख्या नौकाख्या पंचमषष्ठस
प्तमाष्टमतरङ्गाः

५२२

३८-१२-३०

रसतरंगिणी टीका नौका

त्यादयः अनुभावास्तम्भपातनूर्णनादर्शनविस्मरणादयः। यथा। अन्नस्मेरसुवर्णकेतकदलद्रोणीद्युतिद्रोहिणीं लक्ष्मीं वीक्ष्य समुद्यदिन्दुवदनां क्षीराम्बुधेरुत्थिताम्। शम्भुः१
स्तम्भशताकुलः शतमुखः कर्त्तव्यमूढेन्द्रियः सोऽप्यज्ञानभुजङ्गपाशपतितो जातस्त्रिलोकीपतिः १ मोहइति वैचित्र्यार्थकमुहधातोः कर्तृत्वमुत्पन्नतायां वा घञ् इति धात्वर्थे विचत्व
नाद् मूढेति विकल्पपरिच्छेदात्तमश्चिन्तयस्यस्मृतथानस्यभावस्तन्त्रमित्यभिप्रेत्याह वैचित्र्यमिति अन्नेरिति विकसत्सुवर्णवर्णकेतकद्रोण्यन्तर्गतदलकान्तिमतीं प्रसन्नत्वाद्धेरत्वा१
च्च तेनानपास्यस्मयनसमुक्तम् समुद्यदिन्दुवदनामुदयत्कर्णचन्द्राननामुद्गदकान्तिमतीं क्षीराम्बुधेरुत्थितां तेन कदाप्यवीक्षितत्वमुक्तं लक्ष्मीं वीक्ष्य शम्भुः सुरवप्रभवः स्तम्भशताकुलः
सुखकामनासञ्जातासहस्रस्तम्भयुक्तः शतमखो व्ययचित्त इन्द्रः कर्त्तव्यमूढेन्द्रियाद्घूर्णितः सोऽपि सर्वज्ञोऽपि त्रिलोकीपतिर्ब्रह्माज्ञानमेव भुजङ्गपाशो निवार्यत्वात्तत्र पतितो विस्म१
रणावाज्ञानरतिसर्वत्र संबध्यते अत्र लक्ष्मीविषयकावेगविभावितः स्तम्भघूर्णनविस्मरणानुभावितः शम्भुशतमखत्रिलोकीपतिगतो मोहश्चर्वणा विश्रामधाम स्मृतिल
क्षयति संस्कारजन्यं ज्ञानं स्मृतिः संस्कारजन्यं ज्ञानं प्रत्यभिज्ञारूपं स्मरणरूपं च संस्कारजन्यत्वेनोभयसङ्ग्रहः अन्यथा प्रत्यभिज्ञायाः पृथग्भावत्वापत्तेः संस्कारोद्बोधकास्सद१
विभावाः शादृष्टचिन्ताद्याः अनुभावा भ्रूसमुन्नयनादयः। प्रत्यभिज्ञा यथा कालिन्दीसरसः समेत्य नभसः क्रोडे परिक्रीडते चञ्चद्दन्दुमिदं सुधाकरकला मा कम्पविस्फूर्जति च न्द्रोऽपि स्मर१
चापचापलचमत्कारं समालम्बते तस्मात्सैव कदम्बकुञ्जकुहरे राधा परिश्राम्यति १ स्मृतिर्यथा वदनाम्बुजलग्नदृङ्निपाते मयि वधूत्यवतंसमंसमूले दरकुञ्चितदृष्टिराधिकायाः
स्मितकिर्मीरितमाननं स्मरामि १ संस्कारेति प्रत्यभिज्ञामप्यन्तर्भावयति संस्कारेति उद्बोधादिः संस्कारजन्यत्वेनेति स्वविषयतत्त्वावच्छिन्नविषयकसंस्कारसहितस्व१
विषयेदन्त्वावच्छिन्नलौकिकसन्निकर्षजन्यं तदुभयतादात्म्यज्ञानं प्रत्यभिज्ञा स्वविषययावद्विषयकसंस्कारजन्यं ज्ञानं स्मरणम् तथा च संस्कारजन्यत्वस्योभयत्रापि सत्त्वेनेत्यर्थः।
उद्बोधकमेवास्य विभावेऽभिमतमित्याह संस्कारोद्बोधकारेति कालिन्दीति यस्मात्कालिन्दीशपाभत्वात्सन्नयमानत्वाच्च तत्त्वेनाध्यवसितात् रोमावलिः सरसोऽवर्त्तुलत्वाद्गम्भीरत्वाच्च
तत्त्वेनाध्यवसिताया नाभेः सकाशात्समेत्य प्राद्भूय नभसः क्रोडे तनुतरत्वात्तत्त्वेनाध्यवसितमध्यस्यान्तः परिक्रीडते खेलतीदं चञ्चद्दन्दुगोलाकारत्वात्तत्त्वेनाध्यवसितकुचयुगलं सुधा१
निरन्तिशायत्वपि साधनत्वात्तत्त्वेनाध्यवसितोऽधररसस्तस्याकरस्तद्विनाभावात्तत्त्वेनाध्यवसितस्याधरस्य कलामेकदेशत्वात्तत्त्वेनाध्यवसितमुपरितनभागमाक्रम्यतदेकभावना१
गोचरीभूय विस्फूर्जति प्रातस्तामनेकार्थत्वाच्चमत्करोतीत्यर्थः सुधाकरकलाकौटिल्याच्चन्द्रकलात्वेनाध्यवसितेन रवेत्तत्र प्राप्य शोभतइति वार्थः चन्द्राद्धाकारकत्वात्तत्त्वेनाध्यवसि
तस्मरमपि स्मरचापः कामनियोज्यतारुण्यसमाकर्षणीयत्वात्तस्य कौटिल्यत्वाच्च चापत्वेनाध्यवसेया भ्रूकुटी तस्याश्चापलेन क्रियाविशेषेण चमत्कारः शोभातिशयस्तं समालम्ब१
ते भजति तस्मात्तया विना सम्भाविते नाव्हस्तमेलना सैव विरातीनकालावलोकिते वृ राधा कदम्बनिर्मितकुञ्जस्य मण्डपस्य कुहरे राम्यन्त्रे श्राम्यति तिष्ठतीत्यर्थः। अत्र चिन्तास
हकृततादृशसंस्कारसन्निकर्षविभाविता गम्यमुखविकासाद्यनुभाविता प्रत्यभिज्ञा चर्वणा विश्रामधाम्। वदनाम्बुजेति राधामुखकमलप्रतद्रूपमनम्भेघरत्यर्थः अम्बुजपदेन१
वदनाम्बुजे चि लिप्ते त्वयि भ्रमरत्वावेदनादत एव कर्णौ कलनानन्यवतंसं कर्णचिकीर्षितविन्यासं भूषणम् अंसमूले स्कन्धाधोवक्ष्यतिसमति दरेति ईषद्दलितलोचनं स्मितेति हासविचि

नै० का
२
२

तमाननं मुखं स्मरामि स्मृतिविषयतां यामित्यर्थः कथं नाचिन्तयामीत्यर्थः नन्वध्यानं च न स्मरणात्मकमित्युक्तं तावता ग्रन्थकृता स्मरणमनुज्ञानं चित्ते न सकं तथा च प्रतियोगिविधया स्मृतिभावावग
एवमपध्यायात एवेति चेन्न तथा सति किं तच्चिन्ते काग्न्यमित्यपि मग्रन्थानर्थकतयापत्तेः तस्मात् द्विजातीयज्ञानं तन्मूलकं इहकलातायार्थो वसेयं इति न कोपि दोषः एतेन प्रकृतपद्ये स्मृतिर्भावो
वाच्यस्य व्यञ्ज्यता लिङ्गितत्वान्नाप्यलङ्कारः सादृश्यमूलकत्वात्किन्तु विभावमात्रं स्वतःसुन्दरत्वाद्रसे पर्यवस्यतीति वदन्तः समाहिताः स्मृत्याधानो मुख्यार्थपरतायामेव तेषां निरूपितानांप्र
सरात् नन्वतथापीदं मिहितार्थत्वदोषो दुरुद्धर एव संस्कारजन्यज्ञानप्रवृत्तत्वयोगप्राचुर्यादितिचेत्सत्यम् सप्रयोजनत्वलक्षणातिरिक्तस्थल एव तदवसरात् । अत्र चिन्ताहृद्धसंस्कारविभा-
विता गमयभ्रूसमुन्नयनानुभाविताः स्मृतिसर्वेण विश्रामधाम । धृतिं लक्षयति । धृतिः सन्तोषो दुःखैर्बुद्धिर्वा विभावास्तत्त्वज्ञानशान्त्यादयः अनुभावाश्च व्यग्रभोगादयः । यथा । भू-
षा भस्म रजो सिवेश्म विपिनं हद्दो हषो वाहनं चेलं चर्म तथापि मन्मथरिपोर्भोगः किमु भ्रश्यति ईशत्वं किमु हीयते किमु महादेवेति नो गीयते किं वा नस्य च देवदेव इति वा संत्राजनैरुप्य-
ज्यते धृतिरिति सन्तोषः इच्छापर्याप्तिः सा च लाभादेव न भयशोकाभ्यामिति तत इङ्गितधृतिसाधारणं लक्षणान्तरमाह दुःखाभावबुद्धिर्वेति अनिष्टाजनकत्वज्ञानं वेत्यर्थः अनिष्टमि-
ष्टविरोधि द्विष्टमिष्टहानिश्चेति द्वयमपि भवतीत्यभिप्रायेनतरास्पष्टः भूषेति यद्यपि भूषा अङ्गरागो भस्म रजो सि सर्वसुलभानि नतु बहुवित्तव्ययायाससाध्यमृगमदचन्दनादीनि तथापि म-
न्मथरिपोः कामारातेर्भोगः सुखोपभवो भ्रश्यति किमु तथा यद्यपि वेश्म वसतिस्थानं विपिनं वनं सिद्धं न तु कष्टसाध्यं सौधतादि तथापि न सैवत्राप्यनुपपद्यते ईशत्वं जगन्नियन्तृ-
त्वं हीयते ऊनं भवति किमु तथा यद्यपि वाहनं संचारसाधनं हद्दो नाकलितजन्मभूमिर्हषोनन्दी न तु चैःश्रवःप्रभृति तथापि जनैरित्यत्राप्यनुषज्यते स महादेवेति सकलश्रेष्ठ इति वा किं न
नो गीयते न व्यवह्रियते किमु तथा यद्यपि चेलं चीनांशुककार्यप्रावरणकादि चर्म गजकृत्तिर्न त्वन्यद्भाशतन्त्राणि तथापि तस्य च हरगतालङ्कारस्यापि देवदेव इति वा संज्ञा सा साम्राज्यलक्ष्मी
संपन्नैकनिरूढमपि नामजनैस्त्यज्यते किन्नु प्रयुज्यते वा किमित्यर्थः । अत्र गम्यविवेकविभाविता नाचापलोपशमाद्यनुभाविता धृतिस्सर्वेण विश्रामधाम । व्रीडां लक्षयति । स्व-
च्छन्दक्रियासङ्कोचो व्रीडा न च शङ्कायां त्रासे चातिव्याप्तिः तत्र क्रियाविरह एव न तु क्रियासङ्कोचः अत्र विभावा दुराचारादयः अनुभावाः शिरोनमनवदननयनप्रच्छादनादयः ।
यथा यो ध्यावर्णाने । भिन्नोभिन्नोऽश्रुतिफलगतं भालसिन्दूरबिन्दुं दृष्ट्वा दृष्ट्वा कमलनयना केलिदीपभ्रमेण । कान्ते चेलं हरति हरिं तं लोलमालोकयन्ती गात्रं प्रच्छादयति सरसा पाणिप-
द्मरुहेण १ सङ्कुचेति संकुच्यतेऽनेनेति करणव्युत्पत्त्या क्रियासङ्कोचकारणीभूता चित्तवृत्तिरित्यर्थः दानन्तत्वमुपपद्यते सङ्कोचस्य सकम्पप्रवृत्तिसाध्यत्वम् नतु क्रियाविरहस्यो-
ज केत्येव किं न कृतमित्याशङ्क्य नचेति अतिव्याप्तिं वारयति तत्रेति चत्रस्त्यादिः स्त्रीणामेव पुरुषावलोकनमात्रात्संसामेव च प्रतिज्ञाभङ्गमात्राद्व्रीडेति तदुभयसाधारणं व्रीडाविभा-
वं दर्शयति दुराचारादय इति भिन्नावितिकाचित्कमलनयना कान्तेनायकेचेलमञ्चलं हरति सति हरिं तद्विप्रामेतेन अश्रुत्या हषितावेदिता लोलं कातरं यथास्यात्तथालोकयन्ती तस्तत-
श्रुतेः तिपन्न तएव भिन्नो भिन्नावयवा काचनिर्मिता यासज्ञाता भिन्नच्छायायां च चतुर्दिगवस्थितभित्तावपि प्रतिफलगतं प्रतिबिम्बतादात्म्यापन्नं भालसिन्दूरबिन्दुं सिन्दूराङ्कितरत्नकं
दृष्ट्वा दृष्ट्वा पुनः पुनरवलोक्य केलिदीपः क्रीडार्थस्थापितो दीपस्तेन भ्रमेण सा धारणव्रीडाविभावो दर्शितस्तस्य भ्रमेण भ्रमवशेन दत्तेन स्वयं निर्वापितदीपापि मणिमये रतिमन्दिरे १

स्वतःप्रकाशताद्योतनाडुदात्तालङ्कारो व्यज्यते सहसा झटिति गात्रमङ्गमेकवचनेनावयवपि येयप योधरायाविष्कृतं पाणिरेव पङ्केरुहं प्रसारितामुलि दलभाक्कान्तेन लसदंसहृदयसंलया
ङ्गस्वस्ति की हतं यद्वाङ्कमुगलं तेनेति यावत्स्वच्छादयति पिधत्त इत्यर्थः केचित्तु हरित मुपरितनकोसुम्भवस्त्रशोभातिशयाधायकं हरिहर्णमधोशुकमिति चेलविशेषणं कान्तेहरति सति
किंचाली भिर्हरिता यस्मान्नस्मात्साहरितालिकेतिवहरितमपहतं चेलं परिधानीयं लोलं चकितं यथास्यात्तथा लोकयन्नतत्रविषयानुपादानेमव हरेः स्वन्यत्वगमयति साप्राणिपङ्केरु
हेण मुकुलितेन पाणिना गात्रं किञ्चिदेवाङ्कं प्रच्छादयतीति हरि तपदचेलपदयोरन्यतरस्यस्थानत्रयमयं कनाक्तिः हगत्वा योजयन्ति । अत्र नायकालोकनहुत्वचारविभावितानुप्रच्छादन
नानुभाविताव्रीडा चर्वणा विश्राम धाम  चपलतां लक्षयति  इतरेतरक्रियाकारणं क्रियायाः शीघ्रता वा चपलता मात्सर्यद्वेषरागादयो विभावाः अनुभावा वैरिदर्शनवाक्पा
रुष्यप्रहारादयः । यथा । लङ्काचारिणि सेत्वकारिणि रणक्रीडाचमत्कारिणि प्रोद्दामन्दवचूः प्रसारिणि पुरोरामेधनुर्धुन्वति जाताम्लस्पदशाननस्य समरप्रारम्भदम्भस्फुरत्को
पूरक्ताणिताग्रमेयवि शिखव्यागाः करश्रेणयः १  लङ्काचारिणीति लङ्काभिमुखगमनशीले सेतुबन्धकर्तरि रणे संग्रामे या क्रीडा हेला समाश्रितो व्यापारस्तेन च मत्कारिणा पदुतेषो
हृप्रतिपक्षो हे जनसमर्थं तथा सीयो त्साहसमुद्धतं च यद्वचः सिंहनादस्तदुद्गारिणि रामे दाशरथौ पुरोग्रेधनुः स्वापं धुन्वति प्रत्यञ्चाकर्षणेन रणत्कारयति सति तस्य त्रिलोकीजयिनो
पि दशाननस्य रावणस्य करश्रेणयः करणं विंशतिरपि बहुवचनमेकैकपक्षेपसमासक्तानभिमुखसव्यापसव्यबाहुद्वयस्य सव्यापरे वौ पर्ययधसोरपसव्यायोरेवापर्ययधसोसव्या
पसव्ययोर्वापूर्वधसोऽस्य समुदाया सव्यासाचिताभिव्यञ्जकान्वहूनन्ति यत्तपञ्चपञ्चानामेव समुदायाश्चत्वारो बहुवचनार्थ इति कश्चिदाह नहमसाभिधानम् समरेति दम्भोगर्वे
णतो यस्फुरणं मतः समरेत्यादि तद्विशेषणं तथा च समरः आरभ्यते येन तादृशो दम्भो येनेति बुलमाद मम्भः संग्रामके न फलेनोपहितो यद्दशाननस्य वेगोत्र दम्भान्तार्थ स्तेन व्याकुलता बा
हुल्यपूरणस्फुरणेनात्रुमे यापवनं हृस्पवेगातिशयादाणप्रदेशे यासांतथाजाताइत्यर्थः नत्वत्र वक्ष्यमाणमर्ष रूपव्यङ्ग्ये नैवोपपन्नौ किं चपलतायाः प्राधिक्यनेमि वा चयम् रावणे
ल मामर्षस्य चिरन्तनतया युगपत्तावक्रियायाणामिदं प्रथमतायाग्रन्थपपत्तेः अभिनवोदितकार्यस्य कारणेनाप्यभिनवोदितेन भवितव्यम् [illegible] तिचपलतायाः प्राधिक्यात् न
त्वमर्षप्रकर्षएवाभिनवं कारणमस्त्विति चेन्नावतेवसिद्धेनः समीहितम् हर्षमदयोरिवामर्षचपलतयोः पार्थक्यस्य त्वयास्वहस्ते नामकर्षस्य तादृशविजातीयप्रयत्नप्रयत्नकला
पान्यतरोपहितत्वएवपर्यवसानादमर्षत्वावान्तरजातेर्मानाभावादित्याशान्तावत् ॥ इतरेतरेति व्यासज्यवृत्ति धर्मावच्छिन्नक्रियानिष्ठकार्यतानिरूपितकारणत्वाश्रय इत्यर्थः ननु
६१ कारणतावच्छेदकवैजात्यापरिचये दुर्ग्रहमेतल्लक्षणं तत्परिचये तदेव लक्षणमस्त्विति चेन्नैवं तथैवाक्रियाया अतिशीघ्रता क्रियाशेष्यनियामिका विजातीयान्तःकरणवृत्तिरित्य
र्थः एषैवाने लोच्यकारित्वमिति गीयते एतेन प्रकृतोदाहरणे विप्रतिवाक्यवच्छेदेन प्रयत्नानामपि विप्रतिर्भवति ज्ञानानामेवयोगपद्यनिषेधात्तथा चानेकक्रियाकारणीभूता
चित्तवृत्तिरेकानास्त्येवेति नयौगपद्यमतमालम्ब्य प्रजल्पनन्तः समाहिताः तथापि युगपत्तावत्प्रयत्नकारणीभूता याश्चित्तवृत्तेस्तैरप्यभ्युपगमात्तस्या प्रयत्नयौगपद्यसेवा कस्मि
न्नतया दुर्वारत्वादस्माकं तुविजातीयपकएवप्रयत्नस्तावत्क्रियाकारणत्वेनाभिमतः किंवा तत्कारणतावच्छयत्नकारणीभूता वैवेकेत्यन्यदेतत् तावत्प्रयत्नसमुदायएवचपलता

नौका पदार्थ इति तद्युक्तम् अस्य यथा मः कारणतावच्छेदकरूपलक्षणवाक्येपीतरदितरदिति चेष्टाकारणस्यानेकत्वं स्फुरयितं बहुषु वस्तकेषु व्यस्तपागस्य दर्शनादपि च कारणतावच्छेदकस्वरूपलक्ष
३ णवाक्येपि क्रियते नेनेति क्रियाप्रयत्नस्तस्य शीघ्रता यौगपद्यमित्यक्षरानुसारादित्यं च व्यासज्यवृत्तिधर्मस्य कार्यतानवच्छेदकत्वेपि न क्षतिरिति मन्तव्यम् वैरिदर्शने शत्रुगवेषणाम्॥ पूर्वव
त्समप्रमपङ्क्तीयप्रकृतिः॥ अत्र धनुर्धुनिसमुद्दीपितमात्सर्यविभाविता युगपत्सर्वभुजकरणकप्रहारानुभाविता चपलता चर्वणाविश्राम धाम। हर्षं लक्षयति चेतःप्रसादोह
३ र्षः प्रियदर्शनपुत्रजननादयो विभावाः अनुभावाः पुलकस्वेदाश्रुस्वरभेदादयः। यथा। पुलकितकुचकुम्भफालिराधाव्रजति मुकुन्दमुखेन्दुवीक्षणाय विरचयति न मध्यभङ्गभी
तिं गणयति नापि नितम्बगौरवाणि १ हर्षं लक्षयति चेत इति प्रसादः प्रसादहेतुः सुखं तेनानन्तरत्वमायाति प्रियदर्शनेति दर्शनं ज्ञानमात्रं हष्टौ रिष्टप्रदौ राङ्करिति वक्ते नु वीक्षणाय न तु चालावमेव
व्रजतीत्युदाहरणे दर्शनातिरिक्तप्रियश्रवणादेर्वविभावस्यागम्यत्वेपि न क्षतिः पुलकितेति राधामुकुन्दस्य श्रीकृष्णस्य मुखमेवाह्लादकत्वादिन्दुस्तेन राधा वक्षोजाश्मकोरत्वमा
वेदयतोक्तएवागम्यते तस्य वीक्षणाय अवलोकनार्थं पुलकितेति संजातपुलकौ कुचावेव कुम्भौ ते नोच्चनोन्मुखत्वमावेद्यते तयोःपालिमण्डलं यत्र कर्मणि यथा स्यात्तथा व्रजतिया
ति मध्यस्य तनोरपि भङ्गाद्वाधायाभीतिं न विरचयति करोति नितम्बस्य गौरवाणि बहुवचनं कुचयोगौरवाभिप्रायमतएवनितम्बपदमजहल्लक्षणया कुचावपि वक्ति गतिविरोधीत्य
पीतिशेषः न गणयति नानुसन्धत्तेइत्यर्थः। अत्र गम्यप्रियसमागमश्रवणविभावितः पुलकाद्युपस्थायनुभावितो हर्षश्चर्वणाविश्राम धाम आवेगं लक्षयति आकस्मि
केष्टानिष्टनिपातविकल्पः संभ्रमो वावेगः वैरिदर्शनप्रियश्रवणोत्पातादयो विभावाः अनुभावास्त्वराशरीरस्खलनविपर्यासादयः। यथा। एकोवाससि विस्मथेसहचरीस्कन्धेदितो
यः करः पश्चाद्गच्छति चक्षुरेकमितरस्त्वर्धं मुखे भ्राम्यति एकं कण्टकविद्धमस्ति चरणं निर्गन्तुमुत्कण्ठितेचान्यद्वैरिमृगीदृशां रघुपते राज्ञो वसेनाचरान् १ आकस्मिकेति आकस्मि
को यदृच्छया वा निष्टस्य वा निपातः स विकल्पो भ्रमो वा कारणं यस्य तादृशो मनोविकार इत्यर्थः जुगुप्तायामतिप्रसङ्गात्संलक्षणान्तरमाह संभ्रमो वेति संभ्रमपदार्थो वेत्यर्थः वैरिदर्शनप्रि
यश्रवणेत्यादि दर्शनश्रवणे ज्ञानमात्रे तदुक्तम् आवेगो राजविद्रावयत्यादेः संभ्रमो मतः तत्र विस्मरणं स्तम्भः स्वेदः कम्पः स्खलद्गतिरिति एकइति रघुपतेः सेनाचरान् अटनालोक्य दृ
ष्ट्वा वैरिमृगीदृशां कान्तारस्त्रीणामेकः करो विस्मथे त्वराधावनगलितेवाससि द्वितीयः स्खलितावलंबनाय सहचरी स्कन्धे व्याप्त स्थैकं चक्षुः पश्चात् पृष्ठे लोगच्छतिधाटीपरीक्षायेद
तरच्चमार्गमेदप्रसक्तभयाद्दर्शनीथादयेगच्छतो मुखे अर्धं मुखपदेन मुखेनानवलोकनेतस्मर्वत्रैवमदत्वद्विरे इतस्तासामित्यर्थो धन्यते भ्राम्यति एकं चरणं कण्टकविद्धमस्ति मार्गानालोक्य
दत्वा निर्गन्तुं धावितमुत्कण्ठतेभयातिपातादित्यर्थः। अत्र सेनाचरदर्शनानुभावितस्त्वरास्खलनानुभावित आवेगश्चर्वणाविश्राम धाम। यथा वा ममपतिमुपयान्तमकस्मा
न्मथे रथान्त यासमालोक्य यस्खलितमाशुगत्या न चिरात्फलितं मनोरथेस्तस्य अत्र प्रियदर्शनविभावितस्खलितानुविभावितः सतथेति विवेकः नव्यास्त्वाकस्मिको चिन्ति
तबलवन्नरानर्थप्रतिपन्निसंभूतइष्टानिष्टनिपातस्येष्टानिष्टयोर्द्वयोरपि समुच्चित्यारम्भस्य विकल्पः कारणमित्यर्थः संभ्रम इति तत्सकलव्यवहारविषयत्वं प्रदर्शनार्यं शक्यताता संभ्रमपदार्थत्व स्पर्श
वच्छेदको परिचयाहुर्ग्रहतामुच्चकोत्रवाकारः अतएव नोदाहरणस्य नतावतपक्षेष्टानिष्टनिपातपदस्याग्रिमेष्टानिष्टदर्शनपदेन तुल्यार्थत्वमपीति नसंदर्भविशेधइतिप्राहुः
प्रदर्शनेन कार्यविशेषपरिचयद्वारा कारणपरिचयो भवतीति

जडतां लक्षयति ॥ सकलव्यवहाराक्षमज्ञानवत्त्वं जडता न च मूर्छापस्मारनिद्रास्वप्नेष्वतिव्याप्तिः तत्र ज्ञानविरहात् इष्टानिष्टदर्शनादयो विभावाः अनुभावास्त्वनवभाषणनिर्निमेष
प्रेक्षणेष्टानिष्टापरिच्छेदाः। यथा दुग्धाब्धिवारिनिधिपारमुदारवीर्यमागच्छतो हनुमतो दृक्षितविवितेत्रः उद्वीक्ष्य नीरनिधिनीरमयीरवीचि चित्रार्पिता इव पुनः कपयो बभूवुः १ सक
लेति कार्याकार्यविवेकभिन्नज्ञानवत्त्वमित्यर्थः यत्किञ्चिद्विषयकविवेकभिन्नं ज्ञानमतिप्रसक्तमिति विवेकत्वावच्छिन्नसामान्याभिन्नत्वं ज्ञाने प्रापयितुं सकलेति विवेकशून्यत्वमेवास्तु
किं ज्ञानवत्त्वस्येत्याशङ्क्य न चेति समाधत्ते तत्रेति न च स्वप्नेऽज्ञानमस्त्येव तथातिव्याप्तितादवस्थ्यमिति वाच्यम् ज्ञानपदेन मानसान्यज्ञानविवक्षणात् मानसत्वं च जातिरिति ज्ञानसामान्य
स्य मनोजन्यत्वेनासम्भवः इष्टानिष्टदर्शनादय इति इष्टज्ञानसहितानिष्टज्ञानमित्यर्थः साहित्यं सामानाधिकरण्यमभेदो वेति बोध्यम् आदिना चिन्तोत्कण्ठाविरहभयप्रभृतयः। दुग्धा
रेति ये कपयोऽङ्गदादयः सागरपारस्य पयोधेः पारं तीरं प्रतिष्ठितास्संप्रकुरीभवद्दीर्घबलं यस्मिन् कर्मणि यथा भवति तथा गच्छतो हनुमतो दृश्यमानादनुमतः सकाशाद्धसितं हर्षादितेत्रविस्तारितवन्तस्तप
वीरनिधेः समुद्रस्य नीरं जलमयीरवीचीति नीरस्य विधिविशेषणा[illegible] पुनस्तत्र चित्रार्पिता इव निश्चेष्टतया सम्भाव्यमाना बभूवुः। अत्र हनुमन्नीरनिधिनीरोभयविलोकन
विभाविता निश्चेष्टितानुभाविता जडता चर्वणाविश्रामधाम ॥ गर्वं लक्षयति आत्मनि सर्वाधिकत्वबुद्धिः सर्वस्मिन्नधमत्वबुद्धिर्वा गर्वः बलैश्वर्याभिजनलावण्यादयो विभावाः
हर्षः अनुभावास्त्ववज्ञाभ्रूक्षेपितहसितपौरुषप्रकाशादयः। यथा रघुरामवाक्यम्। निःपीते कलशोद्भवेन जलधौ गौरीपतेर्गङ्गयाहोतं हव्यवपुर्ललाटदहने यावत्कृतः प्रक्रमः तावत्तव
मयाविपन्ननगरीनारीदृगम्भोरुहद्वन्द्वप्रस्खलदश्रुवारिपटलैः संस्पृष्टाः पयोराशयः १ आत्मनीति द्वयोरपि समानसंवित्संवेद्यतया विनिगमनाविरहेण तत्त्वमायातीति तत्रैवाह
सर्वस्मिन्निति तथा च समबलयोर्विरोधात्मकोऽवान्तरार्थोऽन्यथा द्वयोरेकत्र निवेशोऽन्यत्रैवेत्यर्थापत्तेरिति भावः निःपीत इति कलशोद्भवेनागस्तिना जलधौ समुद्रे निःपीतेऽशेषचुलुकि
ते सति गङ्गया भागीरथ्याम्बुः शरीरं गौरीपतेः पार्वतीजानेर्ललाटदहने त्रिदिललोचनाग्नौ होतुं प्रवेशयितुं हन्ते निर्वेदे यावद्यावत्कालमध्ये उपक्रमः उद्योगः कृतः आरब्धस्तावत्तावत्कालमध्य एव
मयेत्यर्थान्तरसङ्क्रमितवाच्यमनन्यसाधारणप्रभावं वक्ति तवेदेशो विपन्नेति प्रभूणां नगरीषु पतेनानेकपयोधिपर्याप्तताश्रुणो निवेदिता यानार्यस्ताः साच हन्तेवाम्भोरुहाणीयम्भांसि
रोहन्ति समुद्रमयन्नेत्रयम्भस्तेषां द्वन्द्वमिति बहुसहस्राकानां नारीणामप्यपेतपादैरुल्लयमावेदयितं ततः प्रस्खलदश्रुपयोरूपेणोद्भवपङ्क्तस्य संततवारिजलं तस्य पटलसमुदायोऽत्र बद्धवचनं समुदायग
तत्वाद्धत्वं कथयत्पयोराशिवाङ्त्वं इहयलितेः कृत्वा पयोराशयो रूपाराः संस्पृष्टास्त्यर्थः। अत्र गर्वेण बलैश्वर्यादिना विभावितः पौरुषप्रकाशानुभावितो गर्वश्चर्वणाविश्रामधाम ॥ वि
षादं लक्षयति इष्टसंशयोऽनिष्टजिज्ञासा वा विषादः इष्टपदेन जीवनधनयशःशरीरपुत्रकलत्रादयः विभावास्त्वपराधधनगमनादयः अनुभावास्तूत्तमानां सहायान्वेषणोपा
यचिन्तादयः मध्यमानां विमनस्कता अधमानामितस्ततो धावनमुखशोषनिद्राश्वासादयः यथा प्रत्याहत्य यदि ब्रजामि भवनं वाचां भवेत्सञ्चयो निर्गच्छामि निकुञ्जमेव यदि वा को वेद
किं स्यादितः तिष्ठाम्येव यदि कचिद्धनतटे किं जातमेतावतामध्ये वल्मीकलानिधेः श्याम्ये दयो जातः किमातन्यताम् १ इष्टसंशय इत्यादि अनिष्टजिज्ञासायामपि विषादत्वं व्यवहारादा
हानिष्टजिज्ञासा वेति तथा चेष्टसंशयानिष्टजिज्ञासयोरन्यतरावगत्यर्थमत्र वाकारः अयमेव चावस्थितविकल्प इति गीयते इष्टपदेन विषयसामान्यमेव ग्राह्यं न तु प्रियजनमर्थ्यमेव

समुत्पत्तिर्यस्याः सका शाला ॥ नैवास्य शान्तिर्भवति नीला रूपांतःकरणात् निर्वेदस्यार्थः ५८

नौका ४ ५ काव्यसेवाभिरित्यादा विवक्ष विशेषणेव व्याहेष्टपदेनेति प्राग्वदत्रापि प्रकृतिभेदेनानुभावो भिद्यत इत्यादो न्नमानामिति प्रस्या वृत्येति मध्ये वर्त्म मार्गस्य मध्ये कलानिधेश्चन्द्रस्य समुदयो
जातः किमात्र न्यूनतां को भ्युपायः कर्त्तव्य इति कृष्णाभिसारिकोक्तिः यदि प्रत्यावृत्य भवनं निजं व्रजामि तर्हि वा चाप्रयत्नः प्रतिज्ञाहानिर्भवेद्यदि वानि ऊर्ध्वमेव गच्छामि तर्हि इतः गृहे देषो
द्वारनायविशिष्यानिर्देशः किं स्यात्को नर्थश्चापतेत् को वेद को जानीते न को पि इदं तत्स्वतरां न जाने यदि कश्चिद्वेदो भयमिन्नत्र एव वनतटे उभयतःसंकटो दासीत्यमालम्ब्याति विद्याम्यतावता किं ८ ^
जातेन किमपीष्टानवाप्तेर निष्टावाप्तेश्च नादवस्थ्यादित्यर्थः । अत्राभिसरणे स्वापराध विभावितो ऽनिष्टनिवारणे चिन्तानुभावितो विषादश्चर्वणा विश्रामधाम औत्सुक्यं लक्षयति ।
ओत्सुक्यं कालासहिष्णुता सकलेन्द्रियाणामेकदैव क्रियाप्रारम्भो वा प्रियस्मरणादयो विभावाः अनुभावास्तन्द्रा गात्रगौरवादयः यथा । आद्यः केरपि केलिकौतुकमनोराज्ये द्वितीयः
पुनर्मल्लीकेसरचारुचम्पकनवाम्भोजस्रजां गुम्फनैः काञ्चीकुण्डलहेमहारवलयन्यासैस्तृतीयस्तु तैर्नीतः सुन्दरि वासरस्य चरमो यामः कथं यास्यति । कालासहिष्णुत्वमि
ति प्रियप्राप्तौ विलम्बो मास्त्विति तीव्रेच्छेत्यर्थः नन्वभिष्टकालेनाभिनवसम्बन्धो वितम्बस्तथा च प्रियासमागमेनाभिनवसंबन्धी द्विष्टः कालो मास्त्विति तीव्रच्छा तदिति फलितं न तद्युक्तं येषुः
कालः प्रियसमागमेनापूर्वसंबन्धीभवत्विति तीव्रेच्छौत्सुक्यमस्त्वत्र वाधापकत्वाच्चेत्यतस्तथैवेष्टिः सकलेति सकलानामिन्द्रियाणामेककालीना या क्रिया व्यापारस्तस्य प्रारम्भः अस्ति ह्यौ
त्सुक्याद्व्यापारस्यैक्यमिति भावः आद्य इति प्रातर्दूरसमागतनायकाया नायिकायाः सखी प्रतिसख्यावार्ता या विधनायिकां प्रत्युक्तिः हे सुन्दरि सविवासरस्य दिवसस्याद्यः प्रथमो यामः
प्रहरः केरपि स्वमात्रसाक्षात्कृतैः केलिकौतुकेति क्रीडाचमत्कारमनोरथैर्द्वितीयः पुनर्मल्लीकेसरचारुचम्पकनवाम्भोजस्रजां गुम्फनैर्ग्रथनैस्तृतीयः काञ्चीकुण्डलहेमहारवल
यन्यासैर्नीतो यापितस्तत्सदनन्तरं संप्रतीतिर्यावच्चरमो यामः कथमिति चिन्तां गमयति केनोपायेन यास्यति गमिष्यतिस्म कएषया का योन्तरासमृति दिवसं देही स्यैव प्रतिपन्नेः मल्लीति
बहुवचनेन पुनः पुनः सातिशय कलानिर्माणाभिप्रायं काञ्चीति बहुवचनेन विन्यासानां पुनः पुनः संसनाभिप्रायं शेषं स्पष्टमेव । अत्रागम्य प्रिया समागमन विभावितगात्रगौरव चिन्ता
नुभावित औत्सुक्यं चर्वणा विश्रामधाम प्राज्ञस्त्वेवेतो मीलनं निद्रामीलनं च ज्ञानजनकव्यापाररहितत्वं शरीरत्वं वन्धरतियावत्तत्त्वप्रस्वप्नमन्द्रियान्तरसम्बन्धविरहकालीनत्वगन्त्र
र्गतस्वप्नवहनाडी मनोयोग इति यावदिति वदन्ति तेषां मते निखिलबाह्येन्द्रियसम्बन्धविरहकालीनस्वप्नवहनाडीबाह्य देशावच्छिन्नत्वमनोयोगस्य विभिन्नत्वमिचारिभावतापन्नि
निद्रायारवभावत्वस्यतत्रापि सत्वात्मनो धर्मत्वाच्च तत्याप्युरीतत्सम्बन्धस्य स्वप्नत्वं हन्तितनियमो न घटते स्वप्ने प्रागपि स्वप्न संभवात्तथा च स्वप्ना याक्षिद्रो देशे नियामकाला भवेत्यनुश
यानो निद्रान्तर्गत एव स्वप्न एवं स्वप्ने प्रागवस्थानिद्रेति तत एव स्वप्नात्माक्षि-द्रोदेशं प्रेत्याशयेन निद्रां लक्षयति इतरदिन्द्रियमपहाय मनस्त्वविषयदावर्तनेन तदा निद्रा स्वप्नस्याकार
णत्वात्स्वप्नात्माक्षि-द्राभरतेनोक्ता स्वप्नवहनाडिकायां यदा मनो वर्त्तते तदा स्वप्नसंभवः तत्र विभावाः स्वभावचिन्तालस्यक्लमादयः अनुभावाः पार्श्वकरणनयनभूचालनविभ्रमवचनस्व
प्नदर्शनादयः यथा । गच्छन्कर्षन्नतपनं दुहितुः पितृगच्छावनेसः पश्यन्नस्मदवदनमसकृच्चुम्बनाकुञ्चितेन स्निग्धापाङ्गैः शिथिलचरणः स्नोकविस्पष्टहासः स्वप्ने दृष्टः कमलकलिका
मण्डनो मेवखण्डः १ इतरदित्यादि यद्यपीन्द्रियमपहाय येन्वेव वक्तुमुचितं तथापि तव चिस्थितमतिरिक्तं वायवीयमिन्द्रियं येन मनन्ते तेषां त्वचैवेन्द्रियत्वमभिमतमिति

तदानीं तत्कालीनां तः करणवृत्तिविशेषः स्वप्नमेयि ५

मनेवा ऽयोमा प्रसाङ्गी द्वितीयमिति हितम् तथाच प्रातिस्विकरूपेण प्रहाणलाभात्सर्वमतसाधारण्यमित्याशयः सर्वेन्द्रियक्रियासंपातलक्षणो स्वकानन्तरं सर्वेन्द्रियक्रियाशैथि
ल्यलक्षणः स्वप्न एवगणयितव्य इति मिथ्याप्रक्रामणा चिकीर्षितम् स्वप्नस्येति स्वप्नस्य निद्रानन्तरभावं दर्शयति स्वप्नवद्देति नाडिकायामिमत्यार्थकप्रत्ययेन तत्स्यात्स्वगात्मतावा
प्यते गच्छन्तीति मयामेव खेलः श्रीकृष्णः स्वप्ने दृष्टः कीदृशालपन्तुहितैर्यमुनायाः कच्छतीरमिति गच्छन्त्या पिच्छगुच्छावतंसः किंचास्मद्दर्शने कुञ्चितेनाग्रेण ऽसकृद्दारेवारंवारं पश्य
न्नपिच स्निग्धः प्रेमसम्पर्णैः पाङ्गो नेत्रप्रान्तो यस्यापरं च शिथिलचरणः सालसपदपर्योऽन्यच्च लोकविस्मृतहासः किंचिन्नवत्वप्रवेविकासरतस्य कमलकलिकामण्डनः कमल
कुड्मलभूषणइत्यर्थः । अत्र चिन्ताविभाविताः स्वप्नदर्शनानुभाविताबाह्येन्द्रियमीलनरूपा निद्राचर्वणा विश्रामधाम । अत्रकवेरिदं स्वक्रीसोऽहं यत्स्वप्ने रतिस्थाने निद्रेति पाठेप्र
तीनाभिमतत्वमोदाहरणमेतद्देवानामनुरणीयामनुरणीयमनुरणमनुभावो निद्राविभावरतिचविशेषयति अपस्मारं लक्षयति ग्रहाद्यावेशोपस्मारः तत्र विभावा अपा
२४ वित्रभूत्यस्थितिधातवैषम्योऽङ्गः खेभयादयः अनुभावाः कम्पफेननिःश्वासभूनिपातविपर्यासजिह्वालोलनादयः । यथा । उद्वेलत्त्रवपल्लवाधररुचः पर्यस्तशाखाभुजाः स्फ
जीकोरकफेनबिन्दुपटलव्याकीर्णदेहश्रियः आम्यद्भृङ्गकलापकुन्तलजुषः श्वासानिलोत्कम्पिताः शैलं प्रेत्य कपेर्निपातितमपस्मारं दधुर्भूरुहाः १ ग्रहाद्यावेशइति अ
त्रसंचारादिसंभूतो व्याधिविशेषइति भावः सामान्यतया व्याधिनिर्दिष्टोपि विशेषतया पुनर्निर्दिष्टोऽर्थविशेषद्योतनाय तथाहि सामान्यतो व्याधिर्बीभत्सभयानकविप्रलम्भेषु
भवति तत्रायं विशेषो यद्बीभत्सभयानकयोरपस्माराख्यो व्याधिविशेष एव भवति नापरः विप्रलम्भेतु कदाचिदपस्मारः कदाचिदपरोपीति । उद्वेलदिति उद्वेलन्तो येन वाः
धरथं^ पल्लवास्तएवाधररुचो धरोष्ठसदृशा येषां ते वेपमानस्याधरस्येव सत्त्वं त्वारुणिमाः साद्दृश्यप्रतिपत्तिर्विकाशकत्वयोः क्रमम् तथा पर्यस्ताः प्रसारिता याः शाखास्ताएव भुजा येषां
तेएवं स्फूर्जन्तः प्रकाशमानायेकोरकास्त एव फेनबिन्दवस्तेषां पटलैः समुदायैर्व्याकीर्णा व्याप्ता देहश्रियो देहकान्तयो येषां ते किंच भ्राम्यन्त्विभ्रमयो भृङ्गाणां कलापः समुदाय एव कु
न्तलः केशपाशस्तज्जुषस्तद्युक्तास्तच्च श्वासभूतेनानिलेनोत्कम्पकम्पभाजः भूरुहा द्रोणाद्रिप्रवृद्धाः शैलं द्रोणाद्रिं कपेः हनूमतः प्राक्षिप्रपातनं क्षितलक्ष्मणसंजीवनौषधिशालिद्रो
हा^ णाद्रिमानयतो हनूमतः सकाशान्निपातितं किमिदमिति संभ्रमेन भरतेन बाणसन्धायपातितमिति शैलस्य विधिविशेषणं प्रेत्य दृष्ट्वाऽपस्मारं दधुर्धृतवन्त इत्यर्थः । अ
त्र महीरुहे समारोप्यमाणङ्गः खेविभावितो वास्तविकभूनिपातानुभावितस्थाहार्यारोपविषयीभूतएवापस्मारस्थवर्णो विश्रामधाम । मूर्छापीति तस्याअपस्मारविभावानुभा
वकव्याधितादित्याशयः सुप्तं लक्षयति त्वचमपि विहाय यदा मनः पुरीतति वर्त्तते तदा तत्सुप्तम् निद्राविभावः अनुभावास्तेत्रमीलनप्रलापश्वासोच्छ्वासादयः । यथा ।
श्वासोच्छ्वासप्रबलदधरोपान्तमामीलिताक्षं क्रीडाकुञ्जे तपनदुहितुः स्वपतः श्रीमुरारेः अन्तःस्मेरं निभृतनिभृतं कापि कर्णावतंसं काचिद्दोः कनककवलयं दामसृक्षातिकाचित १
त्वचमपीति अपि नास्वप्नवहनाडीसंबन्धेत्वकहिरिन्द्रियगोचरनास्तीत्यावेदितम् पुरीतति पुरीततस्समाख्यातनाडीषु श्वासेति कापिबाला मुरारेः कुन्दस्य निभृतनिभृतं जागरण
शङ्कया मन्दं मन्दं तः स्मेरं हासगर्भितं यथा स्यात्तथा कर्णावतंसं कर्णिकारं काचिद्दिदृग्धा तथैव दोः कनकवलयं कङ्कणं काचित्स्रजं दाममालां मुष्णातीति सर्वत्रसंबध्यते चोरयतीत्यर्थः अ

अत्र वृत्त्यनुप्रासादि समासमिश्रमध्योतक तथा दिवादेरपि भादिव हाकुतिगलत्वस्य त्पनी त्यादि प्रयोग साधुता यावत्त्वं व कृपया नाम पूर्वम्‌ः २
तथा हि तथा मतिन पुनरेव तत्र नीयोग नाशमा प्रतमंभवाञ्च ञातिथामिरेव स्यात न च तिन्द्राछेदः तत्र मत्र मनोयोगः स्वर्थं तथा र तत्र नीयोग मह कृते न्द्रियजन्य लेपर्य व तिनि तिनिति

नैः का १ 5 त्र किंशत्वा हन्निर्व्याक्षिभेदश्च तिपादन हारा धार्ष्ट्य स्योन्नरोन्नरमतिशयं द्योतयितं तेनावतंस द्दारणोपेत्त याकटककह्‌रणो धार्ष्ट्यमपे दितंदामह्‌रणेत्वतदप्यतिशयितमिति स्फुरितं तेन त्रिवि धायात्र प्रतिनायिकाया अत्र रागोद्रेकोऽध्वन्यते कीदृशस्य मुकुन्दस्ये त्याकाङ्क्षायामाह तपनइ द्वितरिति यमुनायाः कुञ्जेलतामण्डपरूपे ऽधिकरणे स्मासेति स्वासस्याधिक्येन सातिशयं १ कम्पमानो धरश्चान्तो यत्र यथा भवति तथा एवमामीलितमुकुलितीयत्र यथा भवति तथा स्त्वपतः कुञ्जस्यापिकरणस्य सप्तमीनिर्देशादेव शयानस्येत्यर्थात्र वमनाद्ये दोषाशङ्का १ वकाशोऽपीति ध्येयम्‌ । अत्र शयन विभावितेष्यासाय नुभावितं चेतो मीलनरूपं संभ्रंच वर्णा विश्रामधाम विबोधं लक्षयति इन्द्रियाणां प्रथमप्रकाशो विबोधः । निद्राछेदो विभावः अनुभावा अङ्गाकुञ्चनजृम्भाक्षिमर्दनाङ्गुलिमोटनादयः । यथा राधायाः सहसा दृशा कुवलयद्रोणीदरिद्रं नभः कुर्वन्त्याः कलकण्ठकण्ठनिनदैः साकं । तिकेऽजागरः अङ्गान्कुह्‌िविवर्त्तमानवपुषो देवस्य कंसद्विषो लोलापाङ्गतरङ्गभङ्गचतुरं नेत्राम्बुजं पातु नः १ इन्द्रियाणामिति प्रायस्य विभावदर्शने नैव दर्शितं भवती तिनमाह निद्राछेदइति बाह्येन्द्रियमीलनोच्छेदइत्यर्थः अतएव स्वप्नेनातिव्याप्तिः येत्तु चेतो मीलनं निद्रेत्याचक्षते तन्मते निद्रानाशोत्तरं जायमानो बोधो विबोध इति लेषा मेव लक्षणं व्याकुप्येत यद्वा र्वाचीने निद्रेत्यस्यत्वस्मिन्नायोगरत्यर्थं प्रदर्शनमकारि तदनुवधानादेवेति प्रतीमः राधायाइति राधाया दृशा लोचनाभ्यां देवस्य क्रीडाविटस्य कंसद्विषः श्रीकृष्णस्य सहसा बलाल्लोलाक्षं चलाग्रपाङ्गतरङ्गा नेत्रप्रान्तच्छटा स्तेषां भङ्गो रचनात्त्र चतुरं कुशलं नेत्राम्बुजमत्राम्बुजपदं सादृश्यमपि कार्यस्य कारणेन समं विद्धुरिति समात् ङ्गान्याये नन्तरङ्गा नुकूल्यायोक्तं नोऽस्माकं पात्वित्यर्थः कथंभूतया दृशा नभः कीदृशं मण्डपान्तरालं कुवलयस्य तत्वेनाध्यवसितं नेत्रस्पन्दो णीमुकुलीभावस्तया द रिद्रं दरिद्रं कुर्व न्त्या विकसन्नेत्रियावद्दैन्नन भोदरिद्रपदयोः समभिव्याहारेण राधाकर्णयोर्द्वयोरपि नेत्रालिमुकुलीभूतानि न सत्त्वीत्यर्थं मावेदयतानयोः परस्परं कटाक्षानुभूवन्तिमस्याः प्राप्त ते कीदृशस्य कंसद्विषः साकं तिकैः सङ्केतकतैरतएव कलकण्ठस्य कोकिलस्य कण्ठनिनदैः स्वाक्षध्वनि मिलत्तेनाध्यवसितेराधाङ्कराद्विमिरिति यावत जाग्र तो विछिन्ननिद्रस्य पुनः कीदृशस्याङ्गाकुञ्चनविवर्त्तमानप्रत्यञ्चदेहः शरीरं यस्य तादृशस्येत्यर्थः । अत्र निद्राछेद विभावितोऽङ्गाकुञ्चनानुभावितोविबोधस्य वर्णा विश्राम धाम । अमर्षं लक्षयति परहङ्कारप्रशमोत्करसमीहामर्षः विभावाअवमानाधिक्षेपादयः अनुभावाः स्वेदशिरःकम्पनयनारुण्यादयः । यथा अद्याशौनैवमर्षः सम्कि जनयनास्तत्र सेनासमेतं वधात्ताङ्कूलमूले दशमुखमभितो भूतले भ्रामयामः प्रभ्रंस्यार्गवलोकप्रज्वलनयनया सीतयासाकमेनालङ्कायामाशु किंवा रघुपति चरणाम्भोजयोर्जि यामः १ परेति परकीयाहङ्कारस्य प्रशमनेयोत्करसमीहेच्छा सेत्यर्थः अद्येति भर्तृरामचन्द्रस्याप्रवर्त्तनानेवनास्येव तदुक्तं वीरमारुतेरत्यामर्षः अद्याशेषप्रसह्यशीघ्रमाश्या स्मजानकीम्‌ विन्यस्य पुरतस्तस्या आगतुमपिजीवती त्येतावन्मात्रस्य रामचन्द्राज्ञाविषयत्वात श्रीकार्यं तु शीघ्रमसद्यसत्व तत्समनन्तरमेव सुद्धांतस्याः पुरतो विन्यस्यानयाचारतोमापा यात्वागविस्मसनीयताप्रसज्येत पश्चात्तान्नाशङ्काकुलां जानकी समाश्वास्य तस्याः सम्यक्त्वमाधानं कृत्वाम पिजीवतिसतिशीघ्रमित्यर्थः तया विलम्बिते विलम्बासहिष्णुमम पुनर्दर्श नमसम्भावितमेवेत्याशयः आगच्छ पदी त्यवमेयः यद्वेवच्छ सितयामदिशं संपादयेत्कि ते तं किं कुर्यामित्याकाङ्क्षायामाह अद्येति रजनीमेव सरसिजनयनामन्दोदरीमङ्गमे थिनः स्वी

त्यवशं किं तवाहमस्तां केतिरागाघारणहेतुः शंकावस्ते अं ९

निर्णयः ऊर्द्ध्वं त्याऽतिमवि सर्गपाते नरं धातु प्रोक्तलत्ता दृशो निलकरोति त्रिया प्रत्वकुलरात्रौ वेतिवोधम ३८

यात्रिरधिवा चम तथामति तथा त मनोज न ता स्वं माति या मि इ दीधे ते नि ४८

प्राधान्यादस्मार्दितलया प्राङ्गि देशः स्वर्णेर्मेवनादादिः सेनाचवाहिनीत्येवं द्वन्द्वसमासस्तथा चप्रकृतामर्षजन्मामाविष्कर्तुं युद्धमित्रकलत्रादिभिः सह युगपद्देवा सोऽहन्नवरत्नेनेन स्त्रीवधा
नौचित्यर्व्यतिभानात्मकेष्ठानिष्टपरिच्छेदरूपस्तदनुभावमाविष्क्रियते इति काव्यविदां पन्थाः एतेन धर्मशास्त्रविरोधं परिजिहीर्षुभिः केश्चित्सरसिजनयना स्त्रस्य सेनाच्चेति द्वन्द्वमाश्रित:
स द्वयस्मिकः सरसिजनयना पदानर्थक्यापातात् नन्वकस्य सत्कुरिष्याकाङ्क्षा निरासाय तदिति चेन्मैवं कस्य सरसिजनयने त्याकाङ्क्षायां सत्यावनाप्यनुवर्तेः नन्वर्थ्यादिरावणस्य तस्य वसीयता मि
तिचेन्नस्तना वेवतथा तदन्वये भवदीयाशङ्कायै तिवानेव तिनिमीलितनयनं विभावयत भवान् अतएव सरसिजनयनायाः स्तनोः सेनेति तत्पुरुषद्वयमपि व्याख्यातम् तस्यद्वयस्या
प्यानर्थक्यापातात् नाभिः सभेनेयुक्तं दशास्ववरावणमभितः समन्ताल्लाङ्गूलमूलेषु छेवधाभूतले शाम यामो भ्रामयित्वा पातयामः श्रीरामनिकटे पुरात्वागमने विलम्बमाशङ्क्याह
किं वेति अथ्यवेमर्षः शाखुन्निरन्तरं मार्गावलीको मार्गप्रतीक्षात्तया प्रचलेन यनेयस्यास्तया रयं च स्वभावोक्तिरन्तरान्तरा बाधवद्दिपराहताम पि श्रीरामस्वतातद्दुदत्त्रापकस्यक
स्यापि वेत्स्वका भरसमाहृतां संभावनामलङ्करोतीत्यवगन्तव्यम् सीतया साकं सार्द्धमेनां रलोगणकीर्णालङ्कास्वस्याद्यो न्त्यर बुपतिचरणाम्भोजयोर्हि वचनेनानन्यपरायणता वे
यते योजयाम स्तथा सति प्रीत्येत्याह नेत्यत्रैव चलङ्कानिर्दलनस्य सत्कर त्वादिस्यापायः अत्र प्राकर्षवदैवाहोश्वरुषिकयावयं नवीकृतापवनत्वकेनाधिकमेणापरिश्रान्ताः स्मरत्य
मर्षकथं चिद्वा स्वान्तुष्टितमपिवदूवचनं स्वसमभिव्याहारमात्रेणावगमयति । अत्ररत्नः क्रूताधिक्षेपादिनागम्भेन विभावितः परुषोक्त्याद्यनुभावितोमर्षस्थर्वणाविश्रामधाम

अवहित्थं लक्षयति आकारव्यवहारसंगोपनमवहित्थम् विभावानीर्ष्याधार्ष्ट्यकौटिल्यगौरवादयः अनुभावा अन्यथाकरणान्यथाप्रेक्षणान्यथाकथनादयः । यथा ।
रक्षास्मद्विभीषणः सगतवान्बन्धुः सपाथोनिधिः किंचित्कुप्यति सोपि सारणिरतः सीतापरित्यज्यताम् इत्याकर्ण्य सुहृद्गणस्य वचनं स्मेराननो रावणो मुक्ता दामकरेणकण्ठसवि
धे कीरस्य विन्यस्यति १ आकारेति आकारो निर्वेदाद्यनुभावो मुखप्रसादादिः व्यवहारस्तथाभूतएव प्रियोक्त्यादिस्तयोः संगोपनं तथाच्छादनं करणाद्यन्यथाकरणं प्रियार्थः यथेति ।
सबन्धुरपि विभीषणः सद्गृहं त्यक्त्वा गतवान्सोपि शाकवन्धनोपि पाथोनिधिः समुद्रो वद्धः कृतसेतुः सोपि परमाप्तोपि सारणिः किंचित्कुप्यति परकलत्रापहरणं नसह्यं ततः का
रणात्सीतापरित्यज्यतामित्येवं रूपं सुहृद्गणस्य वचनमाकर्ण्य स्मेराननो वहेलितसुहृद्गणवचनो रावणः सुहृद्गणकोपपरिजिहीर्षया हासस्यान्यसम्भूतत्वमवगमयितुं मुक्तादा
मु॰रो॰ ४ म मौक्तिकमालां करेण तामरसात्पेण कीरस्य कण्ठसविधे स्कन्धाभिमुखं विन्यस्यति कथमसौ दाडिमीबीजबुध्याग्रहीत्यनिपरीक्षितं करतलेनोपनयतीत्यर्थः । अत्रगमयद्या रु॰ष्टि॰
ड्यौ विभावितमन्यथाकरणानुभावितं गर्वाद्यनुभावभूतस्य स्वविकासादेः सङ्गोपनफलकमवहित्थं चर्वणाविश्रामधाम उग्रतां लक्षयति उग्रता निर्दयता विभावाअ
पराधदोषकीर्तनचौर्यादयः अनुभावास्तर्जनताडनादयः । यथा । कोदण्डरणभिन्नभूपतिभुजादण्डैः प्रचण्डैः कृतं तन्न्यापतितत्पत्तराजरमणीवेलीगुणैर्गुम्फिता क्रूराकारक
वारतारपतनप्रभृष्टदुष्टदिपन्नुग्र[illegible]द्दत्तलैः कृतो सितिविशिखस्तल्लक्ष्म महीयते १ निर्दयेति प्रचण्डक्रियाकारणीभूता किमस्य करोमीत्याकारिके छेत्यर्थः दोषकीर्तनचौ
र्यादयस्ति स्वीयदोषकीर्तनस्वीयधनाद्यपहरणादयस्त्वर्थः । कोदण्डमिति प्रचण्डैर्दैःरणोति सङ्ग्रामे वपीडितायेराजानस्तेषां याभुजास्ता निरेव दण्डैर्दैर्घ्यात्कोदण्डधनुः कृतं रचि

नौका
६
6
नार

तं तत्र धनुर्षि ज्यासिञ्जनी प्रतिपद्येति शत्रुभूतानां राज्ञां पारमण्यस्तासां वेणी लक्षणो लक्ष्मीरुक्षिता कता विशिखो बाणएकवचनेनैकस्यापि लक्ष्यं न लक्ष्यतरयर्थः आवेदि
तः क्रूरः कठोरस्याकारः स्वरूपं यस्य तादृशस्य कठोरस्य तारसञ्चेर्ये यत्र तनमाचाला व्रतस्य क्रियामात्रेनैव शत्रुः प्रत्यञ्च नोडु ष्टाः कोपाविष्टा ये द्विपा हस्तिनस्तेषां त्रुंगति द्विपप्रत्यञ्चने
दन्तघोरे वाद्यमानाडम्ब्यमानानि यानि दन्ततलानि तैः कृतोस्मिन्नतः एवं कदा चित्सदि प्रोल्लसल्लाभा वल्लत्वेन योग्यं लत्वमुही त्वनेन गवेष्यतेरतिरामं प्रतिपरस्परामस्पोक्तिः । अ
त्रगम्यधनुर्गर्जनं पापपथविभाविजड तानुभावितोग्रता चर्वणा विश्राम धाम मतिलतयति यथार्थतानंमतिः अत्रविभावाः शास्त्रचिन्तादयः अनुभावाः शिक्षोप
देशाभूलेपकरगालनतानुयीदयः । यथा । लाटीवेत्रपुटीपयोधर हृटीकी अकुटीलस्तटीपाटीरद्रववर्णनेन कविमिर्मूहैर्दिनेनी यते गोविन्देति जनार्दनेति जगतीनाथेति कृष्णे
ति च व्याहारैः समयस्तदेकमनसांप्रसांप्रतिक्रामति । यथा यैति निर्धारणात्मकमिति शेषः लाटीति मूढैः शास्त्रचिन्तारहितैः कविभिर्लाटीस्त्यादिलाटीलाटदेशोद्भूत
नायिकासंबन्धिनो लोचनयुगलस्य कुचकलशस्य भुजविस्तारस्य चन्दनपङ्कस्य च निरूपणेन दिनं दिवसो नीयते गतिवाह्यते तदेकमनसामव्यभिचारिभक्तिभाजां समयो गोविन्दे
लीलाप्रस्मर् तिजनार्दनेति जगतीनाथेति कृष्णेति च व्याहारैः परिक्रामति अत्र सर्वत्रेतिशब्दः प्रत्येकं प्रधानप्रतिपादकः । अत्र शास्त्रविमर्शो विभावितानां तथानुभावितानां मतिः स्पर्वणा विश्रामधाम डंसा
। नयादीनामाधिकमाशङ्क्य परिहरति नयेति मस्तुदाहरणादिशेषदं तरस्तानीति शास्त्रसिद्धार्थज्ञानरूपस्य नयस्य लोकरूपता नुवर्तनरूपस्य विनयस्य स्त्राभिलाषज्ञापनरूप
स्यानुनयस्य चोदाहरणानि गतार्थत्वज्ञुपदेशमुदाहरति नयविनयानुनयोपदेशोपालम्भाग्रैवान्तर्भवति उपदेशो यथा वस्तु प्रदेयं खलतो वधेयं मनो निधेयं चरणे हरस्य निजं
विधेयं कृतिभिर्विधेयं विधेर्विधेयं विधिरेव वेत्ति उपदेशो यथेति वसिति वस्तुधनप्रदेयं खलतो दुष्टाद्वधेयं मावधानतयास्थेयं मनोहरस्य चरणे निधेयं स्थापनीयं कृतिभिः
स्वार्थपरायणैर्निजं विधेयं स्वाधिकारिकतया विधिबोधितक्रियारूपं विधेयमनुष्ठेयं विधेर्दैवस्य विधेयं प्रापणीयं फलं विधिर्ब्रह्मैव वेत्ति तेन कर्मफलस्पृहापरित्यागपूर्वकं विहितक
र्मानुष्ठानमुपदिष्टं भवति उपालम्भो विभजते उपालम्भोपि द्विविधः प्रणयात्मा कोपात्मा च प्रणयात्मा यथा पांचालोय दि मार्दवं यदिपयोधराङ्कुराशोदरे कालीनां व
दनेसुधायदि रवेर्गर्भे हिमानी यदि स्थेमा किं च समीरणो यदि तदा स्वप्नेभवेत्सत्पता किं नाम स्मरभूमिपालभगवन्क्रोधान्धधावसि कोपात्मा मर्ष एवान्तर्भवति । यथा । जगद
सि जगदेव देवदेवाभरणसुधारसपीनलं सधावो उरसि वहसि मतथापि तापयसुपतिवक्रसदोसि किं ब्रवीमि । उपालम्भ इति निन्देत्यर्थः प्रणयात्मा प्रणयेनात्मा स्व
रूपं यस्येति स्तुत्यन्यापणयपूर्वकरयर्थः एवमन्योष्यमपूर्वकरतिबोधम् पांचालेरति काचित्सप्रेयांसमवलोक्य विरहव्याकुलासती वसमागमवशात्मम यदुरव
स्थाति वक्तुं मनोभुवमुपालभते हे स्मरभूमिपालभगवन्क्रोधान्धधाकिंनामधावसि वहसि विषयानाक्रमसि ननु स्वयं हृष्टापदार्थैः किमित्याक्रमनेष्वत्समनस्याह पांचालेरत्या पनि
दि मार्दवं प्रस्तरे यदि पयोधराङ्कुराशोदरे यदि सुधाप्याली नां जात्येव स्वभावेनापि क्रोधाधिकेन सुधायात्यन्ता सम्भावयसीत्येन निर्दिशो वदने यदि हिमानी मद हिम ना
रवेर्गर्भे यदि किंच समीरणोवायोस्थेमास्थैर्ययदिभवेत्तदा स्वप्ने सत्यता भवेत्ते न नायकस्य कविनान्तः करणं व्याकुलम् अमर्षएवेति कोपपूर्वकनिन्दायाः प्रणहःकारप्रया

मविषयोत्कटस्मीहारूपामर्षसामग्रीत्वेनतद्याप्यत्वादितिभावः जनयसीति हे देव देवाभरणापरमेश्वर त्वं सेव्यनेन मम दाजनपरिष्टहीतत्वमुक्तम् स्वभावदुष्परिहार्यत्वमाशङ्क्याह स्वधांश
विति नाम्ना विरुद्धएवार्थः प्रतिपाद्यते यथा लोहितो यस्त्ववर्णेन स्वरेवशुक्लेच पाण्डुरः श्वेतः खुरविषाणाभ्यां स नीलो वृषउच्यते इत्यनेन लोहितो नीलसंज्ञयेत्याशङ्क्यनेत्याह जगदि
ति स्वधेति अमृतामिषेकशीतलमेवनेनायोगवावह्नेरलभ्यतेजनयसिकरोषि तथापि हिस्वरूपत्वेपि मे उरसि तापं वहसि प्रापयसि तहे राद्देवत्वमेवं ऊरुषेपरं तृयदुपतिव
यसनत्वयां॰ कृसवौसीति हे तोरहंकिं ब्रवीम्यनेनोचितान्नकिञ्चिद्गलामीतिचन्द्रोपालम्भोयदुपसुपालम्भोपर्यवस्यति । व्याधिंजनयति ज्वरादिविकारोव्याधिः कुपितधातुका
मक्लेशादयो विभावाः अनुभावादशोपद्रवाः । यथा । दातंस्त्रीयमनर्घ्यदीधितिपदं तस्याः करक्री इयाः केयूरं कनकाङ्गुलीयकमपि वाने तं वहिर्गच्छति अन्यत्कस्मै निवेदयामि
किमितो वेणीमिषात्कालियो हृष्ट्वालोचनवारिकालियसरोभ्रान्त्यापरिश्राम्यति १ ज्वरादीति ज्वरादेः संभूतो मानसोविकारः अयमेवस्मानि निदानतयाशङ्क्यः ज्वरनिदा
नमेवात्रविभावइतिप्रतिपादयन्नादिपदग्राह्यं दर्शयति कुपितधातुरिति कामक्लेशादयइति विरहादयइत्यर्थः तदुक्तम् एकैकशोद्वन्द्वशो वात्रयाणांवाप्रकोपतः वातपित्तकफा
नां स्युर्व्याधयो ये ज्वरादयः इदतनमवोभावो व्याधिरित्यभिधीयतइति दशोपद्रवाइति अभिलाषः स्मृतिश्चिन्ता निधनं गुणकीर्तनम् व्याधिः प्रलापउन्मादो जडतो द्वेगइत्यमी
सुदशावस्थाः अत्रव्याधिशब्देन शारीरं सन्तापकार्यमुच्यते इत्यनुक्तं तथैव तल्लक्षणप्रलपनादिवेचपिध्यते चेदत्रपरिहारात् दातमिति तस्याःप्रस्तावायाः करक्रीड
यः कान्तयाः केयूरं वाङ्कभूषणं कर्तृस्त्रीयमनर्घ्यदीधितिसमुज्ज्वलपदं वाङ्करूपं दातेविपरीतकनकाङ्गुलीयकं स्वर्णोर्मिकामानेतमाकारयितुमिव बहिः स्वस्थानमतिक्रम्यगच्छ
ति हे कृष्ण संलोवत्यमाणादन्यदधिकं किं निवेदयामि तस्या वेणीमिषात्केशपाशच्छद्मनाकालियोलोचनवारिवकुलीभूतं कज्जलाहितकालिमं चेदृष्ट्वाकालियसरोभ्रान्त्याया
मुनकूटदभ्रात्या यद्यपि स स्वरस्ववक्त्रम् चित्ततथापिकालियसरःपदस्यतत्रप्रसिद्धिविशिष्टमाहात्म्यतथोक्तम् परिश्राम्यति परितोवर्तते केशसंहताभावाद्दासमतन्नोवेणीव
त्वादितिभावः । अत्रविरहविभाविताश्रुपातानुभाविता व्याधिश्चवर्णविश्रामधाम उन्मादंजनयति विनाविचारमाचारउन्मादः नवागम्यागमने निश्चयातिः
विनाविचार मितिपदेन व्यावर्तनात् तत्त्वस्वरूपस्येष्टस्यतद्देश विचारपवकियानसमीचीनेत्यर्थेतत् अप्रेत्यकारितोन्मादइतियस्यमतं तन्नेदं दूषणम् अप्रेत्यकारित्वमि
भावाः प्रियवियोगविभवभ्रंशादयः अनुभावावृथालपितहास्यरोदनादयः । यथा । नैषाकापिचकास्तिकाञ्चनलतासेवास्ति मे राधिका यद्रा वेत्रकुतोपि जल्पतितदासंमूर्छिता
वर्तते इत्थं हन्तविचिन्त्यसिञ्चतिसुकृतीरैरधीरैर्दृशोर्वीतं व्यातनुतेकरेणभुजयोराधायसंभाषते १ विनेति स्वत्वोद्देश्यकाचरणफलकोमनोविकारइत्यर्थः तत्र
स्वत्वोद्देश्यकत्वस्याचरणविशेषणप्रयोजनं वक्तुमाशङ्कते नचेति नत्वगम्यागमनस्यसफलत्वेनकुर्यान्निष्फलं कर्मेति निषेधविध्यविषयत्वेनतत्कर्तृविगानं तत्स्यादत
आह क्रियेति नसमीचीना मबलवदनिष्टानुबन्धिनीत्येवंरूपमेतद्विगानंनिमित्तमन्यदफलत्वात्पृथगेवतथा च सामान्यनिषेधविध्यविषयत्वेपिपरदाराभिमर्शेन निषेधाद् विशेषतः॰
वतस्यविगानमितिभावः बलवदनिष्टसाधनताबुद्धितिरोधानफलिकान्तःकरणवृत्तिरुन्मादइतिमतस्तुरूढोप्रेणदूषणमप्रेत्यकारितेति । ॥ । नैषेति एषापरिदृश्यमाना

प्राणनिष्क्रमणकाले शरीरप्राणसंयोगस्यार्धभेदेन कथंतदा त्र्यकरणं ॥ विद्यात्यानसुरता आउपेक्ष्यं करोतोऽत्याय भजयोर्निर्दिष्येति तु करोति सेक्वचनानं तु
त्रिरिति सर्वः तत्रप्राण ... कदेशपरस्यरा ... मुख्यं कथं ... भेदास्य तस्मात् ... नेवकेवधु ... त्रिप्राव

काप्युरदीप्तिमतीकाञ्चनलतास्वर्णवल्ली च कास्तिप्रकाशनेरन्ध्रेन विविच्य न ज्ञातेत्यन्वयः किं तु सा परमप्रेमास्पदीभूतामेनमराधिके वेस्यैतान्वेत्यत्राप्यनुषङ्गः न
तुलतात्वरूपविशेषदर्शनाभावेप्यसंलापसंभावितेजात्रमेव तथास्यादत एतदेषापाकरोतीति चेद्दृति यदि कुतोपि कथं चिदपि एषा कानोजल्पतीति नेत्ययति तदेति तिनहीत्य
र्थः संभृद्धितामोदितावर्तते भवतीत्यमेवमादिविचिन्त्य निश्चित्य सखी कृष्णस्तां लतामधीरे धैर्यसूचकैः प्रगुणैरिति यावद्वहौर्गीभीरेष्णुभिर्मृदुवीरं वारं सिञ्चतिवातमधि
कस्वासंयातं तं तेप्रकटयति करेणस्त्रीयेनभुजयोस्तद्वेनाप्यवसितलतामानयोराप्यधिष्ठाने संभावितप्रलपतीत्यर्थं रतिहतीवाक्यम् अत्र वनचकास्तीति वाक्येन विशेषद
र्शनाभावरुक्तः सेवास्तिमेराधिकेत्यविविच्यैवलावलान्तराधान्वप्रकारकज्ञानमात्रप्रेक्षेन अनरस्याभावत्वेनेति तवमनाप्येदोषउद्भावनीयः नन्वेतद्वाक्यद्वयसमभिव्या
हारात्सूतायामेव राधाभानं पर्यवस्यतीति चेद्वश्री ... मादाहरणतापत्तिपन्यर्थमित्युमाहत्यामिदितवनस्तदिदम्वेवतनावतावमनाप्योदोषो न वनरति तत्सुनरेन्नाकविकुल
कर्णामिसारिणीवाणीलावद्भुततरसंदर्हितोहपुटकपाटनिविडितरसगलागलमवस्त्रक्व यदि तललताराधाविविच्यते तिसमदर्भपिष्ठमदस्त्रासावधिप्रासरिष्यादिति ॥
अत्र प्रियवियोगविभावितो हृयादेरनाघनुभावितश्चवर्णाविश्राममधाम मरणं लक्षयति प्राणनिष्क्रमणं मरणं विभावानुभावो सुखौ यथा पयस्तादिद्विवि
कीर्णेबाहुपतितः सङ्ग्राम भूमौ मियान्तहूः शस्यनकेशपाशमनिलस्यद्वेसमाकाङ्क्षति उत्सनीसकरः करं किरतिवा व क्रारविन्दे न वा स्वे स्वधा प्रिमिथः कृथामपिस्मरेः श
व्यकमानन्वेति प्राणेति प्राणनिष्क्रमणसमानकालिकान्तःकरणे इति सम्भवरति वाच्यम् कचिदेवकारणस्यकार्यसहभावेन हेतुत्वं यत्र कार्यसहभावेनान्वय्यय
तिरेकौ यथान्त्यो मणभावस्य न तु सर्वत्रैव तथा देहेन्तु गोरवादित्युमेव च सिद्धभावस्याप्यनुमितोनकार्यसहभावेन हेतुत्वमितिशिरोमणिभिरप्यभ्यथा प्यन्यथा सर्वकाम
वकारणानां कार्यसहभावेन हेतुत्वाभ्युपगमेजितं प्राभाकरैः सर्वत्र विनश्यदवस्थत्वादशायां कारणतसामान्याभावस्य तेषाममभिमतस्य नवाभ्युपगमात् नव्यास्तु तत्तत्पक्ष
स्वरसात्मरणप्राक्कालीनां मूर्छां मरणपदार्थं तयावितवलयन्तिनत्सन्तम् कम्पकेनाद्यनुभावसाम्यादपस्मारेणगतार्थतापत्तेः सह्यावितिपोगते ... अयाविमर्शः पर्यस्ता
द्धीति यमितोलोचित्तिर्भोवरणोयत्रकर्मणि यथा भवति तथा किंच विकीर्णोरतस्ततः पतितौ बाहू दोषौ यथा भवति तथा सङ्ग्राम भूमौ पतितो लतहूः शस्य रावणस्य केशपाशं स्वधु
मनिलो वायुर्मिथाभयेन नसमाकाङ्क्षति न वाञ्छत्यसकरो भानुर्नौलकरं किरणं वक्त्रारविन्दे सुखे पद्मेत्रारविन्दपदेन करकिरणयोग्यत्वमावेदितं तन किरति न प्रसारयति न वा स्व
राटेवाः स्वे स्वधा प्रि यत्रे कनिजालये पतेनबद्धैभिः संभूयकथा हरापास्तेतिस्त्रचितम् मिथः परस्परं समदुःखेनयाचयंभाविनीमप्येतेनोदासीनेनेकेनापि कथा इष्टैवेति सचि
तम् कृथामपितेनात्यथाव्यापारे सत्त्वपराङ्मुखत्वं दर्शितापक्रमितयनेनोच्चैः कथानवसरो दर्शितस्यात तन्वतरवदपिविस्तारयति तेन वाक्यार्थसाङ्केतिकैः पदैरेवव्यवहरन्ती
तिसूचितम् । अत्र सङ्ग्रामविभावितं भूपतनाद्यनुभावितं मरणं च वर्णाविश्राममधाम त्रासं लक्षयति मनोविक्षोभस्त्रासस्तथाच विकारेत्योमनोविक्षोभो भीतिप
कसिद्धमनोविक्षोभस्त्रासरतिविक्षोभेतोवहृयोरेकत्वेनपरिग्रहः तत्र विभावाहोरसत्वनश्रवणघोरसत्त्वदर्शनादयः अनुभावास्तु स्वेदरोमाञ्चकम्पादयः यथा ।

नौकी
7

हुजयोरंत
ततस्याप
यतितु ध्वेति
पुष्पमहिद्राः

तार्किकः
पक्ष

तथा चोत्कटान्यत्वे सति विलोभशब्दवाच्यत्वं त्रासत्वमिति फलितं बोध्यम् ४ भीतिरिति स्यादिति शेषः इति इह भयव्यवहारान्यभीतिव्यवहारविषयत्वप्रदर्शनेन स्यादिभेदो दर्शितः ३

श्रुण्वानो हरिनाम रामवदनादिन्दुस्य शार्ङ्गं वहन् कुर्वन्कालरमान्तरे स भगवान्मैनाकभूमीधरः कुत्रत्यस्तनितिधुग्नितश्रुतिकृतप्रत्यङ्ङ्चोल्लाहनित्यकृत्वाहतिसिन्धु-
पङ्क कुहरे निर्मग्नमाकाङ्क्षति ॥ मनोविलोभ इति मनोविलोभो हि द्विविधः उत्कटोनुत्कटश्च तत्रोत्कटो भयमित्युक्तमेवानुत्कटोपि द्विविधः प्राक्तनभावितमाकस्मि-
कश्चेति तयोरन्यतरपरिग्रहे ऽन्यतराधिक्यं स्यादित्याशङ्क्यापि विहरति तथा चेति विलोभेलोव विलोभगणाहेतैव द्वयोर्विचारोस्त्याकस्मिकयोरेकत्वेनैकधर्मीका-
न्तत्वेन परिग्रहः एकव्यभिचारिभावत्वम् ये तस्यापि व्यभिचारिणोभेदमाह तथा चेतीत्याद्युक्तेषां मते विलोभेलोवेत्याद्यग्रिमग्रन्थाविरुद्धत्वं तत्र स्यापि नामपि व्यभि-
चारित्वस्याग्रे वक्ष्यमाणत्वात्र तत्र तत्स्कन्दो ग्रन्थकृता प्रदर्शित इति वाच्यम् तथाप्यमर्षक्रोधान्यभावस्याकथनान्ननलायाद्युवीरत्वात् श्रुण्वान इति समुद्रोत्तारण-
समये कुत्रापि विषये रामवदनादुक्तं हरीति नाम श्रुण्वानस्तेनैवेन्दुस्य शङ्का वहन्नास्थितानकृतविषयत्वं सन्दिहान इत्यर्थः शतक्रतोः सकाशात् शङ्कोभयवहन्निति
त्वपव्याख्यानम् सकाशादित्यध्याहारगौरवापत्तेः अन्यथेन्द्रादिति पञ्चम्यापत्तेः किं चैवं वमनाप्यदोषापत्तिरिति स्मर्तव्यम् अन्तरे मनस्तालान्तरं चकितं कुर्वन् स भगवान्
नूर्णिनश्शक्तियुक्तो मैनाकनामा भूमीधरः कुत्रत्यस्तनितविलितपत्तमूलेभुग्नितश्रुतिवक्रितकर्णौ तेनैव कृतप्रत्यङ्ङ्चालाहति संपादितसर्वाङ्गकञ्चुकावरणं समकव्याह-
निधृतमौनव्रतं यथा स्यात्तथा सिन्धुपङ्क कुहरे समुद्रकर्दमस्तलभविवरे निर्मग्नमन्नर्यान्तमाकाङ्क्षतीत्यर्थः अत्र शान्तु नामाकर्णेन विभावितेङ्ग सङ्गो चाद्यनुभावित-
स्त्रासश्च वर्णा विश्रामधाम वितर्कं लक्षयति विचारो वितर्कः विभावा विप्रतिपत्तिसंशयसाधकबाधकमानसमुद्भावनादयः अनुभावाः शिरःकम्पभ्रूचालना-
दयः वितर्कश्च त्रिविधो विचारात्मा संशयात्मा ऽनध्यवसायात्मा विप्रतिपत्त्यात्मा चेति अनध्यवसायउत्कटकोटिकः संशयः यथा कालिन्दीविलुठत्कठोरकमठकूर्मं स्थिरः ॥
शाम्भवं रामो वा लक्ष्मणोऽलकोमलवपुर्वनेशो वने सोम्भवः वाहारप्रवेशः त्वलाः द्विति भूतां गोष्ठीगरिष्ठायतनस्त्वस्मात्केवलमेष तिष्ठति ममश्रेयस्करो भास्करः यथा वा सोऽत्र
ऽयमनोभवे नगणनारेखा किमेषाकुलीलावण्यस्य विलोकितं त्रिजगतीमेषाकिमुज्जीविका आनन्दद्रुममञ्जरी नयनयोः किं वा समुज्जृम्भते राधायाः किमु वा स्वभाव-
सुभगा रोमालिरुन्मीलति ॥ यथा वा कथय कथय केयं त्वत्तनं खेलयन्ती विहरति यमुनायाः पार्श्वसि स्वर्णवल्लिः अयमुदयति कोवा शारदः श्रीनभाग्रस्तलदुष्टिरिति
मिरगणमेषको वा विवर्तः ॥ यथा वा रयं नवविलसत्सुधाकरकलाधिकाराधिकाकरं किरणमालिनः किमु सदेह तनस्त्वावपुः न वा कनकमञ्जरी वहति खञ्जरीटं यत
स्तनः स्मरमदालसा कथय केयमुन्मीलति ॥ विचार इति अत्रोहो वितर्क इति प्राचीनलक्षणं चिन्तायामतिप्रसक्तं तस्यामपि कथमिदं स्यादेतेन सन्देहात्मक-
त्वादिना वृथायेनेत्यमभिहितवता विवक्षितार्थनिश्चयानुकूलतर्क इत्ययं भवितुमर्हतीत्येवमाकारक ऊहो विचारपदेनोक्त इति मन्तव्यम् तं विभजते वितर्क इति विचा-
रात्मोत्कटकोटिसाधकोपन्यासरूपविचारेणात्मा स्वरूपं यस्येति अत्र विचार एवेत्यर्थः इदमेतद्दशारेवं भवितुमर्हतीत्येवमाकारकस्तर्कफलितोर्थः संशयात्मा

ना
ति
७:

नि१५२

टीका ८ ४

संशयेनात्मा यस्येति भुत्यत्वासाधारणधर्मदर्शनजन्यसंशयपूर्वक इत्यर्थः इदमित्थमपि भवितुमर्हत्यन्यथापि भवितुमर्हतीत्याकारक इति तत्फलितो-
र्थः अनध्यवसायात्मा अध्यवसायो विपरीतनिश्चयोऽनध्यवसायस्तद्विरोधी विशेषदर्शनमिति यावत्तेनात्मा यस्येति भुत्यत्वविशेषदर्शनपूर्वक इत्यर्थः इ-
दमिदं गुणकृतया कथं स्यादित्याकारक इति तत्फलितोऽर्थः सपर्यायशत्रुरेककोटिकपदेनोक्तो ग्रस्यकृता विप्रतिपत्त्यात्मा विरुद्ध एककोटिद्वयव्याहतधर्मस्य
प्रतिपत्तिर्यत्र तेनात्मा यस्येति भुत्यत्वकोटिद्वयव्याहतधर्मदर्शनजन्यसंशयपूर्वक इत्यर्थः इदमेतद्भृशात्तथापि भवितुं नार्हति तद्धृशादित्थमपि भवितुं
नार्हतीत्याकारक इति तत्फलितोऽर्थः एतेन विप्रतिपत्तेः शब्दरूपतया नान्तःकरणधर्मत्वं चतुर्थी विधानगणपतित्वमुचितमिति प्रजल्पन्नपाकृतः यद्यपि संश-
यात्मत्वेन गतार्थो संभेदस्तथापि संशयवैचित्र्यसमायातमुद्ध्वैचित्र्यमनिवार्यमित्याशयः ननु वैते विप्रतिपत्तिजन्यसंशयपूर्वको हात्मकमेत्यन्तूस्मपि दुर्वो-
हमिति वाच्यम् उक्तसंशयद्वयानुस्तकोटिद्वयसमर्थकविप्रतिपत्तेर्वैचित्र्यानाधायकत्वात् उक्तभेदचतुष्कमनुक्रमेणोदाहरति ॥ कालिन्दीति पू-
र्वं वंशप्रभेणाधनुः पत्नीकृतं कान्त्रकं कालिन्दीत्यादि यमुनायां वर्तमानस्य कठिनस्य कमठस्यैव कविर्नमस्तीरस्याप्यश्वकाकर्षणमिति यावद्रामो दाशरथि-
र्वालस्य नवोदितस्य मृणालस्य बिसस्येव मदुलशरीरो महावीरांशचापाकर्षणपतुराकर्षणेत्यशक्त इति यावत्प्रतिज्ञाभङ्गः स्वचिन्ताकीर्तनमिति रूपनां दर्शयति ।
वंश इति कुलं धुवमवतंसो भूषणमेतावत्कालपर्यन्तमकलङ्कितमिति भावः ननु विवादे प्रतिज्ञाभङ्गेन दोषायेत्यत आह एवमिति दुष्टमतयो व्याहारे दोषोद्भा-
वनविषये प्रवेरा निपुणाः स्तथा च यद्यपि शुद्धं लोकविरुद्धं नाचरणीयमिति न्यायाद्नाचारितां प्रसज्यतैवेतिभावः लोकसम्मतं तात्पर्यं नाचारो नृपादेय
एवमहाजनस्तेनाह तितिभूत्वामिति राज्ञां गोष्ठीसभा गरिष्ठामद्धतीपुरस्मिन्नीत्यत्र प्रङ्कस्तस्मात्कर्तव्यापरिस्फूर्तेर्देषोन्नदिनमुपास्यमानो भास्करो जग-
त्प्रकाशकः केवलमित्यवधारणे मम श्रेयस्करः कल्याणप्रसक्तिस्तिष्ठतीति स्वयंवरप्रसङ्गे रामम् अवलोकयतो जनकस्य सखेदोऽयं प्रसङ्कितिरियम् अत्र मोघ-
त्वं नमयेत्तत्वेति सन्देहविप्रतिपत्त्या विभाविता नाम श्रीरः कस्याग्रे भावितो देवतानुगुणेन पसाथको पन्यासात्मक विचारसर्वके भास्करसाहाय्याद्रामो धनु-
र्नमयेदित्याकारकऊहपूर्वकेण विश्राममयाम ॥ सोऽन्ध्यस्येति मनोभवेन कामेनैवात्यपमानादीर्णालक्ष्यात्मापमलाचगणनारेखा जगत्येकमेवेदं सोऽन्ध्य-
मिति तस्य चिकालिपिः हता किमिति यद्बाला व एत्यसकर्तृ स्त्रिजगतीविलोकितं दर्शनायेति यावडुङ्ग्री विकोलक एवलाप्रयुक्ताभिव्यक्तिकानाडिः किमिति
भावः वेत्यपवानयनयोरानन्दद्रुमस्य वर्द्धमानानन्दस्य मञ्जरी प्रथमोद्भः किंसमुद्रस्यतेवर्द्धतेवाहो स्विदाधायः स्वभावसुभगानिसर्गरमणीयाहेमालिः

किमुनयनयोरुन्मीलति भासनटनिसर्वज्ञान्वेति अत्रवद्धकोटिसाधारणधर्मदर्शनजन्यसंशयाय विभावितो गमय्य भ्रूचालनाद्यनुभावितक
म्पितवक्त्रस्ताट्टशसंशयपूर्वकरुपंराधारोमालिरपिभवितुमर्हति गगनारोहोदिरपिभवितुमर्हतीत्याकारकऊहस्यवर्णनाविश्रामधाम
॥ ॥ कथयेति यमुनायाःशायसितस्याऽवभासमानरोमालिसान्तत्येवा स्वर्गेवल्लिसत्वेनावगताऽश्यचवेजनंतत्त्वेनावभासमाने
वक्त्रः खेलयन्ती नेजयन्तीयंकाऽस्हृहसर्वैववत्वकथयकथयेत्युपहासेवीक्षा तथाशारदातिप्रसन्नःशीतभानुस्तत्त्वेनावभासमानोयंवा
यमपिकुत्रदयत्वभिमुखेमास्ते वास्तविकश्चन्द्र एवायमिति विपर्ययमपाकरोति तद्वदपरीति एवःप्रत्यक्षत्त्लिमिरागांतत्त्वेनावभा
समानानांविवर्त्तःपरिणतिभेदोवाकोऽनालोचितपूर्वस्त्वंकथयेत्यनुयुङ्क्तापिबोध्यः अत्रपरवैमत्यादिनागस्येनविभावितःपराभु
योगेनानुभावितःखेचरात्मकविशेषदर्शनपूर्वकःखेचराधवसितलोचनयुगलेयंनायिकाभवितुमर्हतीतितिमिराध्यवसितध
म्मिलवदिदंचमुखेभवितुमर्हतीतिचोहस्यवर्णनाविश्रामधाम ॥ इयमिति विलसन्ती विशेषेणपत्नीणत्वाऽन्सन्तीप्रकाशमानेन्दुरका
न्तिवान्स्वधाकरकलेवाम्तभरसंभृतापरबिम्बात्मकैकदेशएवाम्तानुस्मृतषोडशकलामूर्तेश्चन्द्रादधिकायस्यांताट्टशीयंराधिकानन
स्यावपुःकिरणमालिनःसूर्यस्यकरंकिरणंमदेतकिंतस्मात्वराधिकानवाकनकमञ्जरीयतःखेचरीदंवहतितनतउभयविलक्षणास्मरम
दालसागात्रगौरवभरितालोकेयमुन्मीलतिदृश्यतेतत्कथयेत्यर्थः अत्राधिकात्वस्यसाधकस्यसूर्यकरसहनरूपबाधकस्यचोपन्यासेनविभा
वितःपरानुयोगानुभावितोऽसाधारणधर्मदर्शनजन्यसंशयपूर्वकश्चायंसूर्यकरसहनान्नराधिकाखेचरीत्वहनान्नकनकमञ्जर्यपिभवि
वमा ४ तुमर्हतीत्याकारकऊहस्यवर्णनाविश्रामधाम ॥ नवोभयकोटिव्यावृत्तधर्मदर्शनेसतिनान्यतरकोटिनिश्चयोभवितुमर्हति तथाचवि
वदितार्थनिश्चयावरूढत्वाभावान्नऊहोदेवितर्कतलक्षणमव्याप्तमितिचान्यम् स्मरमदालसाकृतत्वेनगात्रगौरवादिनाकथंवितर्कह
तश्चर्यावितर्करणेनतत्कोटिनिश्चयात्तुउपपन्नस्फुटंप्रतिपत्तेः ॥ नवदशावस्थास्वकाश्चनदशाधीराःकाञ्चनमानसावस्थाः सन्निय

नौका ८ १

थाव्याधुन्मादरूपेणाशरीरस्तः नचव्यथाव्यापाररुन्मादइतिलक्षणेमानसव्यापारविवक्षयातस्याप्यान्तरत्वंसंभवतीतिवाच्यम् तथासतिप्रलापस्या
र्थक्यानुपपत्तेः तस्माच्छारीरोव्यापाररुन्मादोतएवरसमञ्जर्यांकायिकोवाचिकइतिद्विविधएवोन्मादउक्तोनतुमानसीयोपीकोप्यन्यथाविभागस्यन्यूनता
पत्तेः प्रलापस्यान्तरत्वादेवचनविभागाधिक्यमन्यथावाचिकव्यवहारस्योन्मादस्यप्रगणनानौचित्यात् देवंव्याधिरपिशारीरएवतथैवलक्षणकथ
नात्तत्रव्याधेर्विकारत्वाद्देवर्णस्यसात्त्विकभावएवान्तर्भावः नानाविधव्यापारात्मकोन्मादस्यचपुलकाद्यात्मनोयथायथंरोमाञ्चादिषुविकारा
नात्मकस्यतत्तस्यनउक्तत्वान्मानसस्यतासांमध्येचिन्तास्मृतिजडताव्यभिचारिषुगणितास्त्वभिलाषगुणकीर्तनप्रलापास्तुनेतिकुतइत्याशङ्क्य
ते ॥ ॥ ननुदशावस्थास्वभिलाषगुणकथाप्रलापाव्यभिचारिभावाभ्यन्तरेनगणितास्तत्किंस्वतन्त्राएवतेसन्तीतिचेन्न औत्सुक्येभिलाषस्यव
र्णनात्मकस्मृतौगुणकथायाउन्मादेप्रलापस्यान्तर्भावात् ॥ ॥ नन्विति समाधत्ते औत्सुक्यइति द्वयोरपीच्छाविशेषात्मकत्वादितिभावः व
र्णनात्मकस्मृताविति तथाचतत्त्वकथाविकारएवनभवतीतिगुणकथायास्तद्रूपत्वेनउक्तावप्यन्तर्भावस्तज्जनकीभूतस्मृत्यात्मिकायाएवनतुसागु
णकथारूपफलवैचित्र्यमङ्गीकृत्यस्मृत्यवस्थान्तःपार्थक्येतद्द्वयोरेवसंस्कारजन्यत्वाविशेषाद्व्यभिचारिस्मृतिलक्षणाक्रान्तत्वाद्गुणकथायाःस्मृति
व्यभिचारिभावेन्तर्भावःसंभवत्येवेतिभावः स्वयंचवर्णनेगुणवत्तयाप्रतिपाद्यतेनेनेतिवर्णनंतत्स्मृतिरूपमेवपर्यवस्यतीतिबोध्यम् उन्माद
इति तथाचतदेतल्लक्षणयोर्ग्रन्थकृदुक्तयोर्व्यभिचारव्यवहारपदेसमानार्थकेएवभवतइतिमन्तव्यम् इदमुपलक्षणम् व्याधावुद्वेगोनिविशतेस्व
लक्षणलक्षितस्योद्वेगस्यव्याधिलक्षणाक्रान्तत्वात् तथानिधनंप्राणोत्क्रमणंचेन्नउक्तव्यभिचारत्वान्मरणलक्षणाक्रान्तंचेतदेवनतदिमपिबोध्य लक्षणव्यभिचारिभावः
म् स्वयंचयावस्थायत्रनिविशतेतस्याउदाहरणंतदुदाहरणमेवेतिबोध्यम् ॥ संख्यानियमगुणमसहमानाह ॥ अत्रप्रतिभाति कुलमधिको
व्यभिचारिभावइति तांहलाहरणकलेनरभसास्मेघोपिसंविञ्छितइतिशृङ्गारेदर्शनात् रौद्रेचेन्द्रजालादयः हास्येचव्यपदेशान्यापदेशयोर्दर्श
नात् वीप्सीभेदेगणनाच्च ॥ ॥ अत्रप्रतिभातीति व्यभिचारिपरप्रवृत्तिनिमित्तमनेकरसानुगुणत्वंदर्शयति तांहलेत्यादि एकत्रासनसंस्थि

वीथीभेदे मार्गे विशेषे कलापे दशा स्तु दृष्य... तस्माद्यस्माद्विद्वेति याव... गणनाकृत
प्रयेकं छलस्य दृष्यगणनात्र ।

वृन्दस्य पलतलं नामैौ धर्मीयस्तु लेनानुविद्धः तपोरकल्को धाय्यनन्तकल्कः स्वाभाविको वेदविधिर्निकल्कः
प्रमायं विशाहरणेन कल्कस्तान्यव भावोपहृतानि कल्कः इत्यादि ।

तिः परिहृता प्रस्तुतमाहूरतस्ताम्बूलाहरणछलेन रभसा श्लेषोपि संविहितः आलापोपि न मिश्रितः परिजने व्यापारयन्त्यान्तरा कान्तं प्रत्युपचारतश्चतुर
याकोपः कृतार्थीकृत इत्यमरुकपद्यम् तदर्थस्तु चतुरया तया कयाचिन्नायिकया कान्तं प्रतिकोपः ईर्ष्यामानः उपचारतस्तत्कालोचितक्रियया कृतार्थीकृतः
स्फुटोयं स्फुटतां नीतः कोपप्रकाशो हि कोपापनोदनविदग्धेन नायकेन चाटुकारादिभिरकृतत्वात् तदानर्थकं स्यादिति भावः एकत्र देशे आसनं सं
स्थिति निरूपवेशनं सन्नाहूरतः प्रस्तुतमाहूय्यायामिश्रवगमनात्परिहृता तत्कालं ताम्बूलाहरणछलेन अत्र छलपदं कार्ये गुणीभूतेन तत्प्रत्यर्थं ताम्बूलाहर
णसामानाधिकरण्यानुपपत्तेरिति न वमनाख्यदोषः शङ्कनीयः रभसा श्लेषः प्रेमालिङ्गनम् अपि रभिमुखगमनेन संभावनां गमयति संविहितः स्व
यमेव धाविता गतवत्येति भावः एवं च परिजनं व्यापारयन्त्या उपकरणाहरणादौ निरन्तरं प्रेरयन्त्या आलापोपि प्रश्नोत्तरादिः क्रियावैदग्ध्यमाह नमिश्रितः
प्रस्तुतरितरति बोध्यः नचेदं स्वात्तन्त्र्यमित्याह वीथीभेद इति तच्च प्राचीनैर्निबन्धे तस्य गणनाभावस्यैवेति भावः ॥ तदिदं लक्षयति ॥ ॥
संगुप्तक्रियासंपादनं छलम् विभावाश्च वमानन प्रतिपत्त्यङ्गचेष्टादयः अनुभावावक्रोक्तिनिभृतवीक्षणप्रकृतिप्रच्छादनादयः उदाहरेद्यथा । सं
केतीकृतकाननं प्रविशतोरन्योन्यकौतूहलादन्यत्र प्रतिभानमारचयतोरन्योन्यमुत्सुकयतोः कुञ्जक्रोडमितस्ततः किसलयैरात्मानमाहृत्य तौ राधामा
धवयोर्निकुञ्जकुहराड्डीविकायातनः ॥ ॥ संगुप्तेति किञ्चित्क्रियागोपनफलकस्य क्रियान्तरस्य कारणीभूतान्तःकरणवृत्तिरित्यर्थः अवहि
त्थं निर्वेदाद्यनुभावगोपनफलकं छलं च तदतिरिक्तक्रियागोपनफलकमिति भेदः । सङ्केतीकृतेति निकुञ्जकुहरान्निता मण्डपप्रान्ते स्थित्वा
क्रियमाणा राधामाधवयोरुड्डीविका यैतन्त्रत्येनोस्मान्यानु कथंभूतयोस्तयोः सङ्केतीकृतकाननं दत्तसङ्केतं वनं प्रविशतो रेवमन्योन्यकौतूह
लात्परस्परविषयककौतुकादन्यत्र प्रतिभानमितरेतरयोरपि या ख्यातप्रतिपत्तिर्यथा न भवति तथा व्यवहरतोरतएवान्योन्यमुत्सुकयतोरितरजन
भीत्या स्थगितयोरेवं कुञ्जक्रोडं विवलिताङ्गयष्टिप्रियया भवति तथैतस्ततः कविकविदात्मानं किसलयैः पल्लवैराहृत्य तौ राधादयतौ इत्यर्थः ॥
अत्र विस्रब्धव्यवहारपरीतावविभावितं निभृतवीक्षणाद्यनुभावितं कुञ्जप्रवेशगोपनफलकं च वर्णविश्रामधाम ॥ ॥ सङ्ग्रामे यथा सत्रापि छल
छलं

नौका ऽकूपराम्बुराशी सुरोपकण्ठेऽवतरीतमाणः हर्षोत्कपीन्द्रस्य मुखैः सखेदं मायोजयामास स रामचन्द्रः १ सर्वाणि व्यभिचारिस्थलानि विस्तरभियानोदाहृ
१० तानि ॥ ॥ सप्राणीति कृत्स्नानुग्रातिभासिकसत्ताभाजः कूपराम्बुराशीनैन्द्रजालिकसमुद्रान्सुरोपकण्ठे लङ्कासमीपेऽवतरमाणः पुनरिति तत्रैव सोऽनुभू
10 तपराक्रमो रामचन्द्रः कपीन्द्रस्योदधिक्रमणसम्मुखे हर्षोत्सवे खेदं यथास्यात्तथा योजयामासेत्यर्थः अत्राम्बुराश्यवभासकप्रतिपन्नरात्तसङ्कोचेष्टा विभावितं
तथा हर्षवातानुभावितत्वं वीपस्तत्वावगमगोपनफलकं रामचन्द्रनिष्ठं कुलं च वर्णनविश्रामधाम । ततः सिंहो भवत्सघोयावत्तस्याम्बिकाशिरः छिनत्तिता
वत्तु रूपः स्वेच्छारूपाणि रहथ्यते स्वादेरोरेद्रे पिद्धलं हथ्यते परं तद्विस्तरभियानोदाह्रियते इत्याह । सर्वाणीति यत्तु कथमसौ संख्यानियमो मात्सर्यो हेगद
ऽमर्ष्याविवेकनिर्णयस्त्रैव तमाकृतकोऽनकण्ठोविनयसंज्ञायथा र्षादीनाम पितत्र तत्रोदाहरणेषु दृष्टचरत्वादिति तत्राऽसूयातो मात्सर्यस्यत्रासाद्दुद्वे
गस्यावहित्थाद्दमस्यामर्षादीर्ष्यायामतेर्विवेकनिर्णयपोर्दैन्यान्लज्ञेयमस्यधृतेः सकाशादन्तमायात्रौत्सुक्यात्कुतुककोऽन एवपोर्लज्जाया विनयस्य वितर्कात्सं
शयस्य चापलाद्धार्ष्ट्यस्य च वस्तुतः स्वल्पभेदेऽपि नान्तरीयकतया तदनतिरिक्तत्वस्यैवाध्यवसायान्न विवेचो गौरवादुच्छृङ्खलतायाश्चानौचित्यादन्यथाम
तेरीर्षद्वेनिराया लज्जायास्तदन्तर्भावः स्यान्नदिदं सर्वमभिसन्धायैव विनयादीनां मतान्तर्भावो ग्रन्थकृतोक्तः एषु च व्यभिचारिभावेषु मध्ये केचन केषां
चनविभावा अप्यनुभावा अपि भवन्ति यथेर्ष्याया निर्वेदं प्रति विभावत्वमसूयां प्रति चानुभावत्वं यथा वा चिन्ताया निद्रां प्रति विभावत्वमौत्सुक्यं प्रति चानु
भावत्वमित्याद्यन्यत्र विस्तरः ॥ अथ रसभेदनियतान्व्यभिचारिभावान्दर्शयति ॥ आलस्यौग्र्यजुगुप्साः सम्भोगे वर्ज्याः विप्रलम्भे आलस्यानिनि
र्वेदश्रमशङ्काभिर्वेदौत्सुक्यापस्मारस्वप्नविबोधोन्मादजाड्यासूयाव्यभिचारिणः हास्येऽवहित्थालस्यस्वप्ननिद्राप्रबोधाद्याः करुणे मोहनिर्वेददैन्यजा
ड्यविषादश्रमापस्मारोन्मादव्याधालस्यस्मृतिवेपथुस्तम्भस्वरभेदाश्रूणि च रौद्रे उत्साहस्मृतिस्वेदावेगामर्षरोमांचचंचलतोग्रतास्वरभेदकम्पा
श्च वीरे उत्साहधृतिमतिगर्वावेगामर्षौग्र्यरोमाञ्चाद्याः भयानके स्तम्भस्वेदगद्गदतारोमाञ्चवैवर्ण्यशङ्कामोहावेगदैन्यचापलत्रासापस्मारचल
नमूर्च्छाद्याः बीभत्सेऽपस्मारमोहावेगवैवर्ण्यग्लानिद्याः अद्भुते स्तम्भस्वेदगद्गदताश्रुरोमाञ्चविभ्रमसम्भ्रमाद्याः अन्ये च भावा रसानुकूलाः स्वयमूह्याः ।

स्थायिनोऽपि व्यभिचरन्ति हासः शृङ्गारे रतिः शान्तकरुणहास्येषु भयशोकौ करुणशृङ्गारयोः क्रोधो वीरे जुगुप्सा भयानके उत्साहविस्मयौ सर्वरसेषु ॥
॥ इति श्रीभानुदत्तमिश्रविरचितायां रसतरङ्गिण्यां व्यभिचारिभावनिरूपणं नाम पञ्चमस्तरङ्गः ॥ ५ ॥ आलस्या विति विशेषविधिनिषेध-
योः शेषनिषेधाभ्यनुज्ञाफलकत्वन्यायेन विवक्षितार्थप्रतिपादनं तत्लाघवमभिसन्धायैवेति भावः अत्र पूर्वोत्तरत्र संमुखत्वेनैव तेप्रदर्शिताः वि-
प्रलम्भव्यभिचारिभावानाह विप्रलम्भ इति एवमग्रेऽपि अन्ये हर्षोन्मादस्मृतिमत्यादयः रसानुकूलाः शान्तरसानुकूलाः । यद्यप्यन्येऽपि केचन
रसानुकूलास्तत्तद्रसानुकूलाः स्वयमूह्याः उदाहरणानुसारेणेदृश्याः तथा चेदं प्रायोवादमात्रमिति भावः तदुक्तम् प्रायो न व्यवस्थिते चित्ते भावाः सं-
कीर्णसम्भवाः बाहुल्येन निगद्यन्ते तथाप्येते यथा स्थिताः १ शृङ्गारस्याभयौग्र्यालस्यनिर्व्याधिधिजिन्ना स्मृतिर्मतिः उत्सुकतां विस्मयो हर्षो व्रीडोन्मादौ मदस्त-
था विषादो जडता निद्रावहित्थचापलं धृतिः इति भावाः प्रयोक्तव्याः शृङ्गारेषु यथायथम् २ अमर्षचपलतानिद्राश्रमग्लानिस्तथापि च शङ्कास्-
यावहित्थं च हास्ये भावा भवन्त्यमी ३ दैन्यं चिन्ता तथा ग्लानिर्निर्वेदो जडता धृतिः व्याधिश्च करुणे वाच्या भावा भावविशारदैः ४ ईर्ष्यासूया तथा-
गर्वोत्साहौ मदश्च चापल्यमुग्रता चैव रौद्रे भावाः प्रकीर्तिताः ६ उत्साहश्चापमर्षश्च वितर्कोऽथ मतिर्धृतिः क्रोधासूया तथा मोहश्चावेगः शो-
कहर्षणम् ७ गर्वो मदस्तथोग्रत्वं भावा वीरे भवन्त्यमी सन्तापो मरणं चैव चापलं च भयानके ८ अपस्मारो विषादश्च भयं रोगो मतिर्मदः उन्माद-
श्चेति विज्ञेया भावा वीभत्ससंस्थिताः ९ आवेगो जडता मोहो हर्षणं विस्मयो धृतिः इति भावान्निबध्नन्ति रसेऽस्मिन्नद्भुते बुधाः १० इति कश्चित् संभोगे
वर्ज्या इत्यनेनान्येन वर्जनीया एव व्यभिचारित्वेऽग्रेऽपि दर्शिता रतिवधाम तत्संग्रहम् अथ रसविशेषस्थायिविशेषाणामपि व्यभिचारिभावत्वमस्तीति
विवेचयितुं प्रतिजानीते स्थायिनोऽपीति तदेतद्विवेचयति हास इत्यादि रतेर्व्यभिचारित्वमाह रतिरिति एवमग्रेऽपि ॥ ॥ इति श्रीजसुपनाम-
कगङ्गारामविरचितायां नौकाख्यायां रसतरङ्गिणीव्याख्यायां पञ्चमस्तरङ्गः ॥ ५ ॥ ओम् ओं नमो नारायणाय ॥ ओम् ॥ १
सपरिकरे हेत्वभिहिते प्राप्तावसरं रसनिरूपणं प्रतिजानीते ॥ अथ रसा निरूप्यन्ते विभावानुभावसात्त्विकभावव्यभिचारिभावैरुपनी-

अत एव सूत्रे व्यभिचारिशब्देन निर्वेदादय एव गृह्यन्त इति संप्रदाय इति सर्वत्र व्याः ॥

नौका १२ ॥ यमानः परिपुष्टः स्थायिभावो रस्यमानो रसः ॥ ॥ अथ रसानाह विभावेत्यादि विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति सूत्रस्य विभावा
नुभावव्यभिचारिणां संयोगान्मेलनाद्रसनिष्पत्तिरभिव्यक्तिरित्यर्थः कत्वेपि विभावसात्विकभावयोर्द्वयोरेव मिलनेपि सर्वाभिमतो रसाभिव्यक्तिर्न सि
द्ध्यति सात्विकभावानां हि रूपतया ग्रहणं मपि मेलनस्य तत्र सिद्धेः ततः सात्विके निव्यभिचार्यनुभावयोर्गोबलीवर्दन्यायेन ग्रहणार्थम् परिपुष्टः ।
आलम्बनैरुद्दीपनैरुद्दीपितोऽनुभावैः प्रतीतियोग्यः कृतो व्यभिचारिभिः परिपोषित इत्यर्थः स्थायिभावः रामादिगतकार्यनिष्ठप्रवोपनीयमानो
नटेन विभावादिनानुकार्यरामादितुल्यतानुसन्धानबलादारोप्यमाण इत्यर्थः रस्यमानश्चमत्कारहेतुरिदं च रसपदस्य प्रवृत्तिनिमित्तमुक्तं रसो रसप
दार्थो विशेष्यः तदुक्तं प्रकाशकृद्भिर्व्याचक्षाणैर्भट्टलोल्लटप्रभृतिभिः आलम्बनोद्दीपनैरुत्पाद्योत्पादकभावादुद्दीप्योद्दीपकभावात्तानुभावैर्गम्यगमक
भावाद्व्यभिचारिभिः पोष्यपोषकभावात्संयोगात्सम्बन्धाद्रसस्य निष्पत्तिरुत्पत्तिरुद्दीप्तिरनुभूतिः परिपुष्टिश्च रामादौ नर्तके तु तद्रूपताभ्यासादा
रोपरूपेति यथाह त्रिमेरुपितयात्वेनाग्रहीतैर्विभावादिभिः सर्वैरेव लिङ्गैरुपनीयमानश्चित्रतुरगन्यायेन रामोयमिति बुद्धिविषयेन टेप्रदत्तोऽनु
मीयमानोऽनुपपरिपुष्टः स्थायिभावावस्थातो गतस्थानत्रापन्नः स्थायिभावो रत्यादी रस्यमानतया चर्व्यमाणतया रसपदार्थो बोध्यः तदुक्तं श्रीशङ्कु
कैः राम एवायमित्ययोगव्यवच्छेदविषयायाश्चायमेव राम इत्यन्ययोगव्यवच्छेदविषयायाश्च सम्यग्बुद्धेरनन्तरत्वनीर्णनासौ राम इति बाधायाः रामो
यमिति मिथ्याबुद्धेर्विरुद्धोभयकोटिकाया अयं रामो न वेति संशयबुद्धेः रामसादृश्यविषयाया रामसदृशोयमिति सादृश्यबुद्धेश्च लोकप्रसिद्धा
प्रकृतिनिहृत्सयोग्यतया। याविलक्षणाया चित्रतुरगोयमितिवद्रामोयमिति बुद्ध्यास्वाद्यते नटे न रामत्वानिपत्तेरबाधितमपि विभावादित्रयात्मकं लिङ्गमवधार्यते कथं तद
वगम इति चेत् नटेन कञ्ज्ञी सेयं ममाङ्गेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचन
गोचरं गतेति दैवादहमद्य तया चपलायतनेत्रया वियुक्तश्च अविरलविलोलजलदः कालः समुपागतश्चायमिति चालम्बनोद्दीपनयो
स्तया प्रागेव गुरुशिक्षितमासाद्य रोमाञ्चाद्या विभावनविषये कृते नातिशयितां भ्यासेन रोमाञ्चाद्या विभावव्यक्तौ कृतं गदेरभ्यासपाटवेनैव ।

चतनत्कालोचितकरात्तभुजादेर्पारेस्वप्रकाशानसम्भवात् तेनचरसाख्याल्मास्थायीतत्रानुमीयते सेयमनुमितिरेवमचमत्कारप्रतीतिरूपाचर्वणेत्यु
च्यते चर्वणाविषयएवचस्थायीरसपदार्थः चर्वणायाश्चसामाजिकगतत्वात्तेष्वेवरसव्यवहारइति इत्थंचविभावानुभावव्यभिचारिभिःसंयोगादनुमा(
नाद्रसस्यस्थायिनोनिष्पत्तिरनुमितिरितिसूत्रार्थः ॥ ॥ वस्तुतःसामाजिकेषुरससंस्पर्शाभावेशातकत्वस्तस्यसमारोपेऽनुमितौवाचमत्कारोनस्या
दुक्तसोनुर्यवलादेवप्रकृतविषययोरनयोश्चमत्कारजनकत्वमितिचलोकप्रसिद्धिमवधूयकल्पनायांनसहृदयसमाश्वासोऽसतथाव्युत्पन्नानांच
सामाजिकेषुनाट्यस्याप्यभिव्यक्तिरपिदुर्लभेवान्यथानिर्वासनेषुबालादिष्वपितदभिव्यक्तिप्रसङ्गादित्यपरितोषाद्विभावादिभिःसंयोगाद्भोज्यभोज
कभावसंबन्धाद्रसस्यनिष्पत्तिर्भुक्तिरितिसूत्रार्थंमन्वानस्तन्मतमाह ॥ ॥ भावविभावानुभावव्यभिचारिभिर्भावैर्मनोविश्रामोयत्रक्रियतेसवार
सः ॥ ॥ भावेति स्थायीत्यादिः एतस्मात्तत्रैवविभावादिसमभिव्याहारेणस्थायिभावोपादानेसाधारणीकरणैकतत्प्रयोजनस्फोरणाय विभा
वानुभावव्यभिचारिभावैरिति शब्दात्मनःकाव्यस्याभिधात्मकप्राथमिकव्यापारेणस्वस्वासाधारणरूपेणनिवेदितैर्भावकत्वात्मकद्वितीयकव्यापा
रेणचागम्यात्वप्रकारकरसविरोधित्वानप्रतिबन्धहाराकान्तात्वादिरसानुकूलधर्मपुरस्कारेणपरिस्फुरद्भिर्विभावैःसम्बन्धिविशेषानवच्छिन्नैर्नचतथाभूतैः
स्थाय्यनुभावादिभिश्चेत्यर्थः नचैतादृशव्यापाराभ्युपगमोनिरर्थकःस्वात्मनितन्नायकाद्यभेदबुद्धेरेवागम्यात्वप्रकारकधीप्रतिबन्धसम्भवादितिवाच्यम्।
त दुष्यन्तादिरूपात्मकनायकेधराधीरोदात्तधीरललितात्मनिचाधुनिकस्वात्मरूपत्वाद्वैधर्म्यस्यस्फुटंप्रतिपत्तेस्तदभेदस्यैवदुरवधारणीयत्वात् इत्थंसाधारणीकृ
तेषुदुष्यन्तशकुन्तलादेशकालवयोवस्थादिषुसत्स्वहेतीयीकव्यापारमहिमनिपङ्क्तावागतेसन्निश्चनिष्पन्नात्तृतीयीकेनभोगकृत्त्वव्यापारेणरजस्तमसोः
र्निगीर्णयोःसत्त्वोद्रिक्तसत्त्वजनितेननिजचित्स्वभावनिर्वृतिविश्रान्तिलक्षणेनसाक्षात्कारेणविषयीकृतोभावनेकगम्यःसाधारणीकृतएवरत्यादिःस्था
यीभुज्यमानोरसपदार्थः किंवानिजचित्स्वभावनिर्वृतिविश्रान्तिलक्षणःस्थायिभावभोगोवारसः तदिदमुक्तंमनोविश्रामोयत्रक्रियतेसवारसइति ॥ ।
उक्तंचभट्टनायकैः रसोनतादात्म्येनेत्यादि तस्यार्थः ननटादिगतत्वेनारोप्यतेनचरामादिगतत्वेनोत्पाद्यतइति नाप्यात्मगतत्वेनव्यज्यते किन्त्वभिधा
ख्याव्यापारेणयथावाच्यमात्रस्यतथाकाव्यनाट्ययोरेवसतादितीयेनभावकत्वव्यापारेणसाधारणीकृतेषुविभावादिषुतृतीयेनभोगकृत्त्वव्यापारेणभाव्य

प्रथमानुरागे वासनोत्पादकालंवनानुभवात् सर्वेषां स्वादगोचरीभूतेऽसंजन्मान्तरीयेति यद्यपीदानीं तन्मनस्त्वकालभेदार्जितवासनाभेदेनापि रसास्वादः स्यात् तथापि पुनरभावना भिन्नायेति रस वस्तुतस्तु स्वाभाविकवासनास्यकालिकानुभवमूलकत्वेति प्रभवस्थायिभाववासनाया अभिव्यक्तिः स्यान्नेपि जन्मान्तरीयानुभवसापेक्षवासनाकालीनस्यानुभवसापेक्षवासनाभिप्रायको ग्रन्थः
प्रत्यक्षानुभवस्यैव विषयविषयाकारणत्वात् ॥

नौका 12

मानः स्थायी सत्त्वोद्रेकजनितेन स्वप्रकाशानन्दमयसंविद्विश्रान्तिलक्षणेन पारमार्थिकेन भोगेनाविषयीक्रियत इति ॥ ॥ स्थाय्यादीनां साधारणीकरण
फलकं दैनीयीकव्यापारमन्तरेणाह ॥ ॥ प्रबुद्धस्थायिभाववासनो वा रसः प्रबोधका विभावानुभावव्यभिचारिभावाः न च पूर्वोक्तः प्रथमानुरागे व्याप्तिः
पूर्वानुभवाभावादिति वाच्यम् जन्मान्तरीयानुभवसत्त्वादिति ॥ ॥ प्रबुद्धेति उद्बुद्धा सम्यगभिव्यक्तेति यावत् स्थायिभाववासना सत्सभावस्याप
द्व्यवहार्या उद्बुद्धसंस्काररूपा तदवस्थः स्थायिभाव इति परमार्थः कथं प्रबोध इति तदाह प्रबोधका इति तथा च विभावानुभावव्यभिचारिभिः संयो
गाद्व्यङ्ग्यव्यञ्जकभावसंबन्धाद्रसस्य भग्नावरणचिद्विशिष्टस्थायिनोऽभिव्यक्तिः स्वरूपेणावभासनमिति सूत्रार्थः तदुक्तं श्रीमदाचार्यैरभिनवगुप्तपादैः ॥
लोके कारणत्वादिनाव्यवहार्यैः प्रमदादिभिः स्थायिनो रत्यादेरनुमानेऽभ्यासेन यत्पाटवं कृदिति प्रवृत्तिरूपं न हृतां सामाजिकानां वासनारूपेणान्तःस्थितो
उ विभावनात्मक^ रत्यादिः स्थायी काव्ये गुणालङ्कारादियोगेन नाट्ये च चतुर्विधाभिनयेन व्यापारवत्तादलौकिकविभावादिशब्दव्यपदेश्यो गतप्रदृशा विशिष्टैस्तैरेव व्यञ्ज उमदादिभिः
नेनतपवापहृतां कालानां रसाभिव्यक्तिः किं बहुना परापि स्वाभाविकी वासना तदभिव्यक्तौ हेतुर्यां विनाऽस्फुरितमपि मीमांसकवैयाकरणादीनां
नेसा पटाद्भुः वासना चेन्न हेतुः स्यात्तस्या मीमांसकादिष्विति ननु तथाप्यनभिनिवेशैर्विभावादिभिः कथमन्यनिष्ठस्य स्थायिनोऽभिव्यक्तिरिति चेदुच्यते ।
र नियमस्य नममैवैते नशत्रोरेवैते न तटस्थस्यैवैते तु नियमविधिविरोध^
ममैवैते शत्रोरेवैते न तटस्थस्यैवैते इति सम्बन्धिविशेषस्वीकारपरिहारनियमस्य चानध्यवसायात् तेषां साधारण्येन प्रतीतेस्तथा चामुकस्यैवेम उधारणं विना विभावादीनां
प्रतीतानां तेषां स्वीयत्वासंसर्गाग्रहः स एवं समनस्कदोषस्य माहात्म्यात्सम्भवत्येवेति स्वीयस्थायिभाववासनाभिव्यक्तिर्युक्तैवेति भावः ननु एवं विभावादीनां
साधारण्यापावनैकत्वेऽपि स्थायिनां साधारण्यं कथं स्यात् तद्दात्मासाधारण्यात् तेषाम् न च ममास्त्वतेषां साधारण्ये रसाभिव्यक्तेरसाधारण्येनोपपन्नेरिति वा
च्यम् तथा सति सहृदयसंवादो न स्यात् मास्तु संवाद इति चेदेवं विधालौकिककल्पनायाम् अनाश्वासापत्तेः उच्यते उपायानां विभावादीनामुक्तसाधारण्य
बलाद्रसानुभवकाले स्थायिनां प्रमातृविशेषनिष्ठत्वलक्षणायाः परिमितप्रमातृतायाः विगलनमत्त्वानन्तरदशादुन्मिषितो वेद्यान्तरसम्पर्कशून्योऽप
रिमितो भावो यस्य तेन प्रमात्रा सकलसहृदयसंवादका विनाप्रमातृविशेषसंबन्धाग्रहरूपेण साधारण्येन स्थायी चर्व्यते न तु चर्वणाविशिष्टस्थायि
भावमात्रं न रसः रसं ह्येवायं लब्ध्वानन्दी भवतीत्येवमाद्युपाश्रुत्या सहृदयप्रमाणेन चानन्दस्वरूपतायास्तत्रादरादिति चेतत्स्वप्रकाशानन्दैकत्वज्ञानलक्षण

स्वाकारवदुदयमाना चर्वणा भिन्नस्यात्मानन्दस्यापि विषयीकरणात् स च चर्व्यमाणतैकप्राणश्चर्वणानाशेन नश्यन्नत एव विभावादिजीवितावधिर्निरु-
चर्वणं त्वस्य साधारण्यरूपेण विभावैर्नवभासमानकरसस्यायेन चर्व्यमाणः पुर इव परिस्फुरन्हृदयमिव प्रविशन्सर्वाङ्गीणमिवालिङ्गन्नन्यत्सर्वमिव तिरो-
दधद्ब्रह्मास्वादमिवानुभावयन्नत एवालौकिकचमत्कारकारी शृङ्गारादिको रसः स च न विभावादिकार्यः उत्पन्नस्य तस्य तत्कालित्वसंभवसामग्रीक-
स्य तन्नाशकस्य समवधानपर्यन्तं विभावादिचर्वणानाशेऽपि सत्त्वप्रसङ्गात् हितापेक्षाभ्युद्योरिव कार्यनिमित्तकारणयोर्नाश्यनाशकभावकल्पना-
यां गौरवपराहतत्वाद्‌नुपपत्तेः एवं स्वरूपेणासतो ज्ञाप्यत्वस्याप्ययोगान्नासौ ज्ञाप्योऽपि विभावादिभिरेव समुत्पाद्यज्ञाप्यत एवस्वपिन विचाररमणीय-
म् कार्यवैचित्र्ये सामग्रीवैचित्र्यस्य नियामकत्वात् काव्यार्थस्य विभावस्यास्यापि स्वरूपाजनकत्वाच्च किंच स्वप्रकाशानन्दत्वात्तु पक्षान्तरस्य चत्वत्तोऽप्यत्व
व्यावर्तनेनायमस्वभिन्नतज्जन्यज्ञानविषयत्वरूपं ज्ञाप्यत्वं मुख्यमिष्टं तत्प्रकृतेन संभवत्येव स्वाभिन्नतज्जन्यज्ञानविषयत्वरूपं तज्ज्ञाप्यत्वं तन्निषेधा
का॰ ८ यः अपि तु विभावादिचर्वणात्मकविभावादिजन्यज्ञानाकारेण चैतन्यग्राह्य एवासौ मन्यते तदुक्तम् विभावादिभिर्व्यज्यते चर्वणीय इति कारकज्ञाप-
काभ्यामन्यो हेतुर्न सिद्ध इति चेदलौकिकसिद्धेर्भूषणमेतन्न तु दूषणम् येन रसे विभावादिकार्यत्वव्यवहारस्तेऽपि व्यञ्जकविभावानुभावव्यभिचारिणां चर्वणा-
या उत्पत्त्यात्मोपचारात् गुणालङ्काराद्यसंभिन्नरसादिविषयलोकिकप्रमितेर्जगद्गुरुविषयप्रज्ञानप्रमितेर्वा ह्यार्थसंस्पर्शरहितात्ममात्रविषयसकप्र- पु॰
मितेश्च गुणालङ्कारसंभिन्नरसादिमात्रविषयतया विलक्षणाया संविन्नहेतुतया ज्ञाप्यत्वव्यवहारा अपि तत्र सांप्रदायिकानाम् प्रागसत्त्वादिव ग्राहकस्या-
प्यभावान्न मुख्यज्ञाप्यपदप्रवृत्तिनिमित्तवानेषः तथाहि यत्तत्ग्राहकं न निर्विकल्पकं विभावादिपरामर्शस्य निर्विकल्पकजननायोग्यत्वात् नापि स्व-
भिन्नसविकल्पकं चर्व्यमाणस्यालौकिकानन्दमयस्य तस्य स्वसंवेदनमात्रसिद्धत्वात् चर्वणादशायां ज्ञानान्तराभावात् स्वाभिन्नसविकल्पकविषयत्वेन
ज्ञाप्यत्वं विशिष्टमेव न तु ज्ञानं तावद्द्विविधमात्मचैतन्यरूपं निर्विकल्पकमेकं स्वभिन्नसविकल्पकं च द्वितीयं तयोर्मध्ये ज्ञाप्ये स्यात्का विषयत्वेनान्यविषयत्वम-
गच्छन्न ह्यान्यतरविषयत्वाभावेन चोभयविषयत्वमापद्येतेतच्च विरुद्धमिति चेन्न तदिदं स्वाभिन्नसविकल्पकविषयत्वरूपं लोकोत्तरचमत्कारमेव रसचर्व-

न पुनः मृतप्रणामः स्त्रेरसेनस्य स्याप्यवच्छिन्नचिदानंदस्येम्यैः न्या सैव सरणिः
शब्दावरणभंगो वा ::

अद भज्जनानं दुरधितेहतनो विशालतंशोन्नतेः ... यसानुपपत्तुत तेःघ ... रानोबुभे ... भगः ... भहिमादेः

नै॰ का॰ १२ 13

णायामेवावगमयतीति आगुक्तम् इति सारस्याप्यस्याप्यवच्छिन्नाभग्नावरणा चिदेव रसः इति सहृदयस्य निजसहृदयतावशोन्मिषितेन विभावादिचर्वणाम-
हिम्नातन्नस्याप्युपहितस्वस्वरूपानन्दाकारसमाधिनायोगिनरवान्नः करणवृत्तिर्वा चर्वणापदार्थः इयं च विभावादिविषयसवलितचिदानन्दालं-
बनत्वादेव परब्रह्मास्वादात्समाधेर्विलक्षणा भाव्या च कार्यव्यापारमात्रादिति न चास्तु विभावानुभावव्यभिचारिणां संयोगाद्भावनात्मनश्च दोषा-
द् रसस्यानिर्वचनीयदुष्यन्तादिरत्यात्मनो निष्पत्तिरिति तिस्रस्त्वर्थं मताकाव्येनाश्रेषु चक विनानटेन च प्रकाशितेषु विभावादिषु व्यञ्जनाव्यापारेण दुष्यन्तादौ
शकुन्तलादिरतौ गृहीतायां समनन्तरमेव च तत्र सहृदयतोल्लासितस्वभावनाविशेषरूपस्य दोषस्य महिम्ना कल्पितदुष्यन्तत्वावच्छादितेस्वात्मन्यज्ञाना-
वच्छिन्ने शुक्तिकाशकलरजतवत्तदुत्पद्यमानो निर्वचनीयः सातिभास्यः शकुन्तलादिविषयकरत्यादिरेव रसः नन्वनानार्थस्थले पराक्षेपकाश-
करणिकार्थबोधोपपत्तौ नातिरिक्तव्यञ्जनाव्यापाराभ्युपगमः समुचितः शक्तिनियमनपूर्वकव्यञ्जनोल्लासमभ्युपगच्छद्भिरपि नानार्थस्थले गर्थे हृदयप्र-
तीत्यङ्गीकारेण भद्रात्मना द्विपकृत्स्ना हरादस्पर्शनं वरमिति न्याया नियमनोल्लासयोरेवाप्रामाणिकत्वादिति चेन्न अवला नाश्रियं हता वारिवाहैः सहा
निशम् तिष्ठन्ति चपलायत्र सकालः समुपस्थितः स्यादावशङ्कानां द्रुमसपदृष्ट्वा जलवाहकैः पुरुषैः सह पुंभस्पोरमत्तरस्यार्थान्तरं स्वनतावद्बलावारिवा-
हचपलापदैर्योगरूढ्याशक्त्ते बोधयितुमेवास्य विद्युत्वाद्युपरितस्यैव तस्यार्थस्य प्रतीतेरन्यथा चमत्कारो न स्यादतएव न योगशक्त्यापि केवलया रू-
ढ्यार्थासंवलितार्थबोधकत्वस्य तस्या रूढिसमानाधिकरणाया अप्रसक्तेः पुंश्चलीत्वादेः सर्वथैव तदविषयत्वाच्च तस्माद्योगरूढस्य शब्दस्य योगेरूढ्या
नियन्त्रिते धियं योगस्यैशोऽर्थस्य यास्तेव व्यञ्जनैव सा एवं स्थिते नानार्थस्थले पुष्पमायाः प्राकरणिकाप्राकरणिकार्थगतायाः प्रतिपन्नये व शपंवाच्ययोः
र्थव्यञ्जने पैताप्राकरणिकस्याप्यर्थस्य प्राहव्यञ्जनयाप्रतिपन्नावलेल्लिक्षुक स्यनयेस्माशयेन प्राचीनोक्तं नानार्थव्यञ्जकत्वं न दुष्यतीत्येवमाद्यन्यत्र
विस्तरः अयं च कार्योदोषविशेषस्य नाशपश्च तन्नाशस्य स्वोत्तरभाविनाल्लोकोत्तराह्लादेन भेदायहास्तस्वपदव्यपदेश्योभवति स्वस्वरूपोपस्थितरत्या-
दिनाचभेदाग्रहादिति त्वैनैकत्वाध्यवसानादावरणभङ्गस्य वर्णीयशब्दोच्यते वह्लादकदुष्यन्तत्वमप्यनिर्वचनीयमेवावच्छादकत्वं चरत्यादिविशिष्टबोधेवि-

शकुन्तलादिविषयकरतिमान्दुष्यन्तः

कल्पनीयपदेपस्थितिमूलकशक्तिजबोधकल्पनया = २

४० न अतएवच रहस्ये पंदरमंनायमानस्य बोधस्य श्च मंवारणयनार्थज्ञानहेतत्वाच्चेः ... कार्यनावच्छेदकघटना ... व्यंजनाख्यीकार्येनपालनम्
अगृहीतगृहीतविस्तारार्थान्तरशक्तिकस्य पुंसो व्यंजनोल्लासस्याप्यनभ्युपगमात् ... त्यादाहूत्वाऽत्रकल्पनात्र ... शक्तिरहस्ये ... ८

योगरूढस्य ... बला ... योगे नियन्त्रि ... ना

अर्थान्तरं शक्तेर्बोधयितुम्

शोच्यतावच्छेदकत्वम् एतेन दुष्यन्तादिनिष्ठस्य रत्यादेरनास्वाद्यत्वान्न रसत्वं स्वनिष्ठस्य तस्य शाकुन्तलादिभिरतत्संबन्धिभिः कथमभिव्यक्तिः स्वस्मिन्दुष्य-
न्ताद्यभेदबुद्धिस्तु बाधबुद्धिपराहतेत्यादिकमपास्तम् यदपि विभावादीनां साधारण्यं प्राचीनैरुक्तं तदपि काव्ये नतेषु शाकुन्तलादिशब्दैः शाकुन्तला-
त्वादिप्रकारकबोधजनकैः प्रतिपाद्यमानेषु सत्सु दोषविशेषकल्पनं विना दुरुपपादम् अतोवश्यकल्प्ये दोषविशेषे तेनैव स्वात्मनि दुष्यन्ताद्यभेदबुद्धि-
रपि सूपपादा नन्वेवं रतेरस्तु नाम दुष्यन्तरवसहृदयेपि सुखजनकता करुणरसादिषु तत्स्थायिनः शोकादेर्दुःखजनकतया प्रसिद्धस्य कथमिव स-
हृदयहृदयाह्लादकत्वं प्रसक्तनायकरव सहृदयेपि दुःखजनकस्यैवौचित्यात् न च सत्यस्य शोकादेर्दुःखजनकत्वेपि कल्पितस्येति नायका-
नामेव दुःखेन सहृदयस्येति वाच्यम् रज्जुसर्पादेर्भयकम्पाद्युत्पादकतापत्तेः किंच सहृदये रतेरपि कल्पितत्वेन सुखजनकतानुपपत्तेरिति चेन्न।
सत्यम् शृङ्गारप्रधानकाव्येभ्य इव करुणप्रधानकाव्येभ्योपि यदि केवलाह्लाद एव सहृदयहृदयप्रमाणकस्तदा कार्यानुरोधेन कारणस्य कल्पनीयत्वा-
च्छोकोत्तरकाव्यव्यापारस्यैवाह्लादप्रयोजकत्वमिव दुःखप्रतिबन्धकत्वमपि कल्पनीयम् यदा ह्लादवद्दुःखमपि प्रमाणसिद्धं तदा प्रतिबन्धकत्वं न क-
ल्पनीयं स्वस्वकारणवशाच्चोभयमपि भविष्यति अथ तत्र कवीनां कर्तॄणां सहृदयानां च श्रोतॄणां कथं प्रवृत्तिरनिष्टसाधनत्वेन निवृत्तेरुचितत्वादिति चेदिष्टसा-
धिकायादनिष्टस्य चन्दनानुलेपनादाविव प्रवृत्तेरुपपत्तेः केवलाह्लादवादिनां तु प्रवृत्तिरप्रत्यूहैव अश्रुपातादयोपि तत्तदानन्दानुभवस्वाभाव्या-
न तु दुःखात् एव भगवद्भक्तानां भगवद्वर्णनाकर्णनादश्रुपातादयः समुत्पद्यन्ते न च तत्र जातुचिदपि दुःखानुभवोस्ति न च करुणरसादौ स्वात्मनि शोकादिमद्दशर-
थादितादात्म्यारोपे यथाह्लादस्तदा स्वप्नसन्निपातादौ वा स्वात्मनि तदारोपेपि स स्यादनुभविकं च तत्र केवलं दुःखमिति काव्येपि केवलं दुःखमेव स्यादि-
ति वाच्यम् अयं हि लोकोत्तरस्य काव्यव्यापारस्य महिमा यत्प्रयोज्या अरमणीया अपि शोकादयः पदार्था आह्लादमलौकिकं जनयन्ति विलक्षणो हि कम-
नीयकाव्यव्यापारजन्मा स्वादः प्रमाणान्तरजादनुभवात् तज्जन्यत्वं च तज्जन्यभावनाजन्यत्वं स्मृत्यादिविषयत्वम् तेन रसास्वादस्य काव्यव्यापाराजन्यत्वेपि न क्ष-
तिः शाकुन्तलादावगम्यात्वतानोत्पादस्तु स्वात्मनि दुष्यन्ताद्यभेदबुद्ध्या प्रतिबध्यत इत्याद्यः अनिर्वचनीयख्यातिमनभ्युपगच्छतां व्यञ्जनाव्यापारमप्यविदु-

नव्याः

काव्यव्यापारात्स्वे शोकादेर्दुःखं =

कल्पितत्वं

काव्यव्यापारजन्य =

...काव्यापारशक्तिक...

नै का॰ १४ १५

णां विद्वांतार्किकाणां मते ऽप्रागुक्तदोषमहिम्ना स्वात्मनि दुष्यन्तादितादात्म्यावगाही शकुन्तलादिविषयकरत्यादिमदभेदबोधो मानसः काव्यार्थभाव [भावना विशेष]
नाजन्मा विलक्षणविषयताशाली रसपदार्थो भवति तत्र च विभावानुभावव्यभिचारिणां संयोगाज्ज्ञानरूपाद्दोषाद्रसस्य ज्ञानविशेषात्मनो निष्पत्तिरु-
त्पत्तिरिति सूत्रार्थः सच बोधः स्वात्मनि दुष्यन्तत्वधर्मितावच्छेदककशकुन्तलादिविषयकरतिवैशिष्ट्यावगाही शकुन्तलाविषयकरतिमान्दुष्यन्त-
इत्याकारकप्रत्यक्षः स्वात्मत्वविशिष्टे शकुन्तलाविषयकरतिविशिष्टदुष्यन्ततादात्म्यावगाही शकुन्तलाविषयकरतिमद्दुष्यन्तोऽहमित्याकारको द्विती-
यः स्वात्मत्वविशिष्टे दुष्यन्तत्वशकुन्तलाविषयकरत्योर्वैशिष्ट्यावगाह्यहं दुष्यन्तः शकुन्तलाविषयकरतिमांश्चेत्याकारकस्तृतीयोऽपि तत्र च सर्वत्रै-
व रतेर्विशेषणतया विशेष्यतया ज्ञानस्य विशिष्टज्ञाने हेतुतया काव्यार्थभावनाकाले शकुन्तलादेः प्रतीयमानाया अपि तस्याः प्रत्यक्षेणादिलिङ्गकमनुमानमभ्यु-
पगन्तव्यम् स्वाप्नादिबोधेऽतिप्रसङ्गवारणाय काव्यार्थभावनाजन्मेति बोधविशेषणम् नन्वेवं रसस्वदत इति प्रयोगानुपपत्तिरास्वादपदार्थस्य बोधस्य
रसाभिन्नत्वादिति चेदास्तां तर्हि रतिमात्रपरो रसशब्दः स च रसो न लौकिकबोधात्मा किं त्वन्तःकरणविषयोऽप्यलौकिकसन्निकर्षसंपन्न इति न रतिस-
त्तामपेक्षते ॥ विभावादीनां त्रयाणां मेलनात्मकसंयोगाद्रसनिष्पत्तिर्नाम रसपदव्यवहार इति सूत्रार्थं मत्वा तत्त्रयाणां समुदितानां केऽपि रसत्वमाम-
नन्ति विभावादिषु [मध्ये] संयोगाच्चमत्कारात्स इति सूत्रार्थं मत्वा त्रिषु कोऽपि चमत्कारी चेत्स रसो नान्यथेति बहवः भाव्यमानो विभाव एव रसस्तथा विथो-
नुभाव एव रसो व्यभिचार्येव वा तादृशो रस इति त्रयाणां समुच्चित्य रसनिष्पादकत्वमभिहितं वतो भरताचार्यस्यानभिप्रेतत्वादनादेयम् व्याघ्राद-
यो विभावा भयानकस्येव वीराद्भुतरौद्राणामश्रुपातादयोऽनुभावाः शृङ्गारस्येव करुणभयानकयोश्चिन्तादयो व्यभिचारिणः शृङ्गारस्येव वीरकरुणभ-
यानकानामिति तेषां प्रत्येकं नियतरसव्यञ्जनानुपपत्तेश्च एवं स्थिते ह्यसाधारणविभावाद्येकमात्रोपादानेऽपरयोराक्षेपोऽस्त्वेव इति स्मर्तव्यम् । तदाह्ला- [मिति मन्तव्यं]
दाविनाभूतो वह्नीभिर्वङ्कभिर्वङ्कुः प्रोक्तो रसो विलोहृद्यः प्रपञ्चेस्तीत्यनर्गलम् ॥ यद्यपि नाट्ये रसस्थितिं निगदता भरताचार्येण काव्येष्वेनां निर्दि-
शता श्रीरुद्रेण च नाट्यकाव्ययो रसं भवं लौकिको भेदः समुपेक्षितस्तथापि घटव्याप्तिधेयरसस्वरूपनिरूपणप्रतिज्ञानवनःस्वस्यन्ततादृशभेदोऽनुपेक्षणी

यएवेत्था चायेन रसं विभजते ॥ ॥ स च रसो द्विविधो लौकिको ऽलौकिकश्चेति लौकिकसन्निकर्षजन्मा लौकिकः अलौकिकसन्निकर्षजन्मा
त्वलौकिकः ॥ ॥ स चेति प्रवृद्धस्थायिभाववासनात्मेत्यर्थः एते न कारणान्यथ कार्याणि सहकारीणि यानि च रत्यादेः स्थायिनो लोके
तानि चेन्नाट्यकाव्ययोः विभावा अनुभावास्तत्कथ्यन्ते व्यभिचारिणश्च इति सर्वानुमतनिबन्धं तत्र विभावानुभावव्यभिचारिपदं चालौकिकयन्तो लौकिके
रसे विभावादिशब्दाभिधेयैरलिप्यन्ते विज्ञानतामतएव रसपदार्थत्वविपर्ययमन्यमानानामाधुनिकानां लौकिकभेदग्रन्थस्य मात्रोमेव तामूल
कताप्रयुक्तानादरणीयता ग्रन्थिः शिथिलिता भवति एतदपि कल्पनामात्रमिति तन्मार्गाह्निः सः किन्तु प्रायो नाट्यप्रतिष्ठोन्नाभरतादेः रसस्थि
तिः यथामतिमयाप्येषा कार्यप्रतिनिगद्यत इति श्रीरुद्रग्रन्थप्रागेविद्याः । लौकिकेत्यादि अत्र वासनात्मनास्थितस्यापि स्थायिनः सर्वस्येव का
लान्तरीणस्य स्वाव्यवहितप्राक्कालीनलौकिकसन्निकर्षजन्यत्वाद्रसपदार्थस्य विद्यस्थायिस्वरूपेतथात्वं न भेदकम् किन्तु रसोत्पत्तिनिदानभूतव्य
ञ्जकविभावानुभावव्यभिचार्यन्यतमत्वेनान्यत्रैलौकिकसन्निकर्षजन्यत्वं तस्याय त्र विभावाद्यन्यतमस्य लौकिकसन्निकर्षस्तद्व्यतिरिक्तो भयत्र व
लौकिकस्तत्रापि लौकिकभेदतासिद्ध्यर्थमन्यतमत्वेनत्रयाणां निवेशः यद्यपि व्यभिचारिणामान्तरतया न कदापि लौकिकसन्निकर्ष इति तदुपादा
नमनर्थकमिति प्रतिभाति तथापि स्वाभिव्यञ्जकविभावानुभावलौकिकसन्निकर्षस्यैव स्वाभिव्यञ्जके व्यभिचार्यभिव्यञ्जकविभावानुभावलौकि
कसन्निकर्षस्यापि लौकिकभेदतानियामकत्वमेव युक्तं न तु तत्राऽलौकिकभेदत्वमित्याविष्कर्तुं तदुपादानमितिमन्तव्यम् ॥ ॥ लौकिकसन्नि
कर्षःषोढाविषयगतः अलौकिकसन्निकर्षोत्तानं तेषु चानुभूतेषु साक्षादेतज्ज्ञानमनुभूतेषु प्राक्तनसंस्कारद्वाराज्ञानमेव प्रत्यासत्तिः ॥ ॥
रत्यंच विभावमात्रस्य संयोगसन्निकर्षमात्रग्राह्यत्वेपि गुणक्रियातद्गतवैजात्यादिद्वारितमूर्त्तिकानाम त्रभावानामिन्द्रियषट्केनापि यथा यथं ग्र
हसंभवात्तात्रिकसमुपदर्शितसन्निकर्षभेदषट्कानाम्यतमस्येवरसस्थायिभेदषट्कं समभायातीत्यभिप्रायेणाह लौकिकः सन्निकर्षः षोढेति ॥ अ।

कार्यतात्पर्ययोरन्यतरस्य संस्कारसामग्रीवैचित्र्यसंपादकत्वमेकप्रमाणत्वादितिभावः विशेषेपि सामग्रीवैचित्र्यसंपादकत्वमन्यतरस्येति ५

लौका· १५ 15

लौकिकेत्यादि सामान्यलक्षणायोगजयोस्तन्त्रप्रसिद्धयोरपिप्रकृतानुपयोगादाह ज्ञानमिति ज्ञानमेवेत्यर्थः स्वाश्रिकेभेदेज्ञानात्मनः सन्निकर्षस्या
सम्भवमाशङ्क्याह तेष्विति विभावादिष्वित्यर्थः इयंचसतिसप्तमी साक्षाद्विभावानुभावव्यभिचारिभावचर्वणाव्यवहितप्राक्कालवर्तित्वश्रव्या
सन्याप्रतिसन्नमित्यर्थः इदंचज्ञानमेवप्रत्यासत्तिरित्यर्थेतनेवान्वेति एतज्जन्मानन्तभूतेष्वपीति स्वाश्रिकादिपदार्थेष्वित्यर्थः संस्कारद्वारा तादृश
चर्वणाव्यवहितप्राक्कालिकजन्मान्तरीणानुभवजन्यसंस्कारप्रत्यासत्त्याप्रत्यासन्नमित्यर्थः ॥ ॥ अलौकिकंविभजते ॥ ॥ अलौकिकरस
स्त्रिधा स्वाश्रिकोमानोरथिकऔपनायिकश्चेति औपनायिकस्यकाव्यपदपदार्थचमत्कारे ॥ ॥ अलौकिकइति तृतीयस्यविषयंदर्शयति औपनायि
कश्चेति काव्यपदपदार्थचमत्कारइति यद्यपिकाव्यरस्येवसत्त्वचंतथापिप्रसङ्गादुक्तिभङ्ग्याकाव्यलक्षणप्रकंभवतीतीत्यममिहितम् तथाहि
काव्यभूतौयौपदपदार्थौतयोश्चमत्कारइत्यस्याचमत्कारिणोपदपदार्थौकाव्यमित्यभिहितम् तदुक्तंमम्मटभट्टैः तददोषौशब्दार्थौसगुणाव
नलङ्कृतीपुनःक्वापि अस्यार्थः अदोषौदोषशून्यौसगुणौगुणवन्तौमाधुर्यौजःप्रसादभेदभिन्नगुणवद्रसव्यञ्जकावितियावत् क्वपुनरिति क्वचि
न्नित्यर्थः अभिव्यक्तोत्मकरसभेदसत्वइतियावत् अनलङ्कृती नञोल्पार्थत्वादल्पत्वस्यचास्फुटत्वएवपर्यवसानादस्फुटालङ्कारवन्तावपीत्यर्थः अ
पिनायत्रनाभिव्यक्तोरसस्तादृशौतस्फुटालङ्कारौपदपदार्थौसंगृह्येते इत्यत्रचानलङ्कृतीपुनःक्वापीत्यनेनाभिव्यक्तेरसस्फुटालङ्कारान्यतरवत्त्वा
विशेषितं तत्काव्यमितिज्ञेयमिति तत्रचदोषगुणालङ्काराणामनुगमेपिलोकोत्तराह्लादरूपचमत्कारजनकतावच्छेदकत्वेनानुगतीकृतानां
तेषांसर्वेषामत्रान्तर्भावः तथाचैतस्यापिप्रकृतार्थपर्यवसानम् तेचदोषगुणालङ्कारारसास्वादप्रतिबन्धकत्वकाव्यशोभासंपादकत्वकाव्यो
त्कर्षाधायकत्वरूपाबहुविधाः प्रत्येकंमम्मटभट्टादिभिर्विततीकृत्यदर्शिताविस्तरभियानदर्शितेतेनएवज्योत्स्नाभिसारिकेंकृष्णाभिसारिकयाह
विरहिण्यावासप्सज्जटीतिनेमिसरणविधितन्निषेधजीवनकष्टातिशयतात्पर्यकेविधौमण्डलस्थशशाङ्कितमित्यादिनिरलङ्कारणादावपिकाव्यत्वसिद्धिः

तेषु टिप्पणीः: कृत्यभिहितम् तत्रपदार्थौ तत्पदार्थौ

या॰

निरुक्तानुगतरूपाकांक्षायासमानविषयत्वेसमर्थस्यविभावस्यप्रतिपादकत्वात् ॰

लोकोत्तरत्वं चाह्लादे सकलसहृदयसंविदेकगोचरो जातिविशेषः नन्वेवमननुगतस्य गुणालङ्कारादिजन्यतावच्छेदकत्वं तस्य न संभवतीति चेन्न तत्तज्ज्ञा
तिव्याप्यजातयः सन्त्येव ता एव सकलानुभवसाक्षिकास्तज्जन्यतावच्छेदिका इत्येतावतापि च व्याप्यतादृशजात्यवच्छिन्नजन्यतानिरूपितजनकतावच्छे
दकत्वेनानुगमस्य निर्बाधीकृतत्वात् एतेन चमत्कारजनकतावच्छेदकधर्मस्वरूपकाव्यत्वग्रहं विना चमत्कारजनकताग्रहोऽशक्यस्तज्जनकताग्रहं विना त
द्धटितकाव्यत्वग्रहोपि नेत्येतिपरस्पराश्रयः नच विभावादिमत्त्वमेव चमत्कारजनकतावच्छेदकमिति वाच्यम् तथापि तानि चेन्न द्राग्नुकाव्ययोरित्युक्त
त्वाद्धि भावत्वग्रहात्काव्यत्वग्रहाधीनादेव जनकताग्रहो जनकताग्रहे च तदवच्छेदकत्वरूपकाव्यत्वग्रह इति द्यन्तरितचक्रकस्य दुर्वारत्वादिति हृयलम्
तत्र कं वेदितव्यम् विच्छित्तिविशेषजीवातुगुणालङ्कारादिप्रभेदानामेव प्रातिस्विकरूपेण जनकतावच्छेदकत्वादुक्तानुगतरूपेण चैषामेव काव्यत्वरूपता ते॰
च न हि प्रातिस्विकरूपाननुगतरूपयोः परस्परसापेक्षत्वग्रहकत्वमिति कुतोन्योन्याश्रयादिः एवं स्थिते काव्यलक्षणे काव्यत्वे शब्दार्थयोः यो व्यासज्यवृत्तिकपर्य
न्तं वेति विप्रतिपन्नो दण्डिप्रभृतयो वर्णयन्ति शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावलीति इत्यमेव हि तदर्शोष्टशब्दार्थौ विस्तार्यार्थविशेषविशिष्ट
शब्दस्य विशेषणात्मकत्वं तथाभ्यर्हितत्वेन पूर्वनिपातोऽभ्यर्हितं पूर्वमिति स्मृतेरन्यथा जातह्न्यत्वेनार्थशब्दस्यैव पूर्वनिपातापत्तेः नचैवं गुणप्रधानभावे
दनुपपत्तेः हि वचनानुपपत्तिरिति वाच्यम् प्राधान्येऽपि तयोरिवं गुणप्रधानभावेऽपि तद्दर्शनात् नच तत्र गुणत्वं तदन्यासत्वे तिगुणान्तरीयानिर्देशरूपबाधकव जायापती गुणिनमा दधीयतां तामिलत्व
लात्तथाभ्युपगतमिह तु तदभावात्तेन किंचिद्बाधकमिति वाच्यम् काव्यत्वजातेर्व्यासज्यवृत्तित्वाभ्युपगमगौरवस्यैव तथात्वादर्थस्य सिद्धत्वेन लोको
त्तरवर्णनानिपुणकविकर्म काव्यमिति समाख्याविरोधाच्च मिश्रास्तु काव्यपदप्रवृत्तिनिमित्तं हि काव्यत्वं तज्ज्ञान्वयव्यतिरेकाभ्यां रसपदेतिनानिरि
क्तजातेर्मानं तथा च बाधकाभावाद्द्विवचनस्यौत्सर्गिकस्वभावहाने मानाभावः नच समाख्याविरोधो मूर्द्धाभिषिक्तबाधकमिति वाच्यम् अर्थस्यापि वि
भावादिरूपत्वेन विभावपदप्रवृत्तिनिमित्तभावनायाः काव्यकारणेन विकृतिविषयत्वस्य वक्तुं शक्यत्वात्तस्मादुभयत्रैव काव्यमिति ताद्दृः नव्यास्तु लो ते॰
कोत्तराह्लादजनकज्ञानगोचरार्थप्रतिपादकशब्दत्वं काव्यत्वं लोकोत्तरत्वं च चमत्कारत्वापरपर्यायो जातिविशेषः पुनः पुनरनुसन्धानात्मकभावनाजन्य

नै·का· ९६ 16

तावच्छेदकोऽपेक्षः प्रत्यक्षसिद्धः तथा विधतदादिसर्वनाम्नि तेद तन्नानुगतत्वे व्याप्तिर्दुर्वारैवेति चेदुच्यते ज्ञानादि शब्दार्थ विषयभावनात्वं वमत्का
रजनकतावच्छेदकं तत्त्वमित्यर्थादेवमपि यत्र तत्त्वानुगमश्चेति चेत् स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकत्वसंबन्धेन ज्ञानादिशब्दजा
तिमत्त्वं काव्यत्वमनुगतमेवेति शब्दार्थयुगलेत्वनकाव्यशब्दवाच्यमानाभावात काव्यमदुष्टं पद्यमिति काव्यादर्शोक्तव्याख्याने काव्यश्रुतमर्थो
न ज्ञातस्तस्मादिति विश्वजनीनव्यवहारतः शब्दविशेषस्यैव काव्यपदार्थत्वप्रतिपत्तेः स व्यवहारः शब्दमात्रे लक्षणयोपपादनीय इति चेत् स्या
देवं यदि काव्यपदार्थतया परामिमते शब्दार्थयुगले काव्यशब्दशक्तेः प्रमापकं दृढतरं किमपि प्रमाणं स्यान्नत्वेवं तत्र पश्यामः विमतवाक्यं
त्वस्मदुक्तमेव इत्थं चासति काव्यशब्दस्य शब्दार्थयुगले शक्तिग्राहके प्रमाणे शब्दे काव्यव्यवहारतः शब्दविशेषे सिद्ध्यन्ती शक्तिं को नाम निवारयि
तुमीष्टे न चैवं तददोषौ शब्दार्थाविति मम्मटस्योक्तिर्विरुध्यत इति वाच्यम् ऋगतावितिधातोरौणादिके यप्रत्यये निष्पन्नस्यार्थशब्दस्यार्थम
णमात्रपरतया तात्पर्यमानस्यार्थकत्वात् तत्र कोशेषयोः शब्दपदार्थपदयोः कर्मधारयसमासे द्विवचनबलाद्रमणीयार्थप्रतिपादकताव
च्छेदकानुपूर्वीविशिष्टो शब्दो काव्यमित्यस्यैव तदर्थत्वात् न चैवं मम्मटशब्दस्य सर्वनिष्ठत्वापत्तिरिति वाच्यम् विशेषणे विशेष्यत्वबहुत्वमि
ति बहुत्वस्यहृष्टत्वात् कथमयं तथैकवीरिसादयः प्रयोगाः न च सर्वकालेकसर्वजनसमुदायेन वकेवलाः समानाधिकरणे नेमे नैकवीरेति सिद्धो
द्विति वाच्यम् अस्य परतया तद्बाधकत्वात् न चैवमसाधुः शब्दो दुर्लभ इति वाच्यम् अष्टाध्यायीलक्षणलक्ष्यत्वाभासमुद्दिश्यमानाश्रयशि
ष्टरूपदिष्ट एव शब्दः साधवोऽन्ये च भूयांसस्ते त्वतभाश्च साधवः केचिच्छिष्टा इति चेदुच्यते अष्टाध्यायीलक्षणलक्षितत्वे निमित्तं त्वदृत
तमैसर्गिकीला स्वदुज्ञानानाप्राकरणानभिज्ञाश्रयिपंकेचनागतिकगतिकलत्वलेनरथावत्त्वदलक्षणत्वमविप्रयुज्जतेतेश्रमर्वतः शिष्टार
ति न चैवमध्यवसीयते पदसौशब्दो निरुक्तलक्षणलक्ष्यत्वइति तदिदं प्रपाटादीति सत्रभाष्यमहताप्रबन्धेन निरूपितं तत्किं मम्मटमहैः
काव्यपभाषितं येन शिष्टानभवेत् शुद्धिमलमात्रदेलनिति शङ्कः अत्र ब्रूमः स्वविशिष्टार्थप्रतिपादकत्वस्वविशिष्टत्वद्वय नियामकस्य संब

सर्वापरत्वघमनरम
जहुन्यममानमध्य
नथ्यमवीरास्थे ४

जनकतावच्छेदका॰

न्यत्वे मानाभावात्स्वविशिष्टार्थप्रतिपादकतावच्छेदकानुपूर्वीविशिष्टशब्दस्य काव्यत्वं वाच्यं तत्तदर्थप्रतिपादकतावच्छेदकानुपूर्व्युपलक्षणं वि
शेषणं वाऽऽद्ये वर्णानां नित्यत्वेनानादृशानुपूर्वीविशिष्टानामपि यदाकदाचित्तादृशानुपूर्वीविशिष्टत्वाल्लोकप्रसिद्धपाठानां स्पर्शानां समुदाये
ऽतिव्याप्तिरिति विशेषणतापक्षस्त्वपवादत्त्वव्यस्तथा च काव्यत्वघटकीभूताः सर्व एव पदार्थास्तत्र तत्र विशेषणतयैव निविशन्तेऽन्यथा क्रमाय
दोषापत्तेस्तस्माद्विशेषणेषु काव्यत्वं विना विशेषणविशिष्टविशेष्यासंभवन्नस्तर्वेषे वा तेषु सिद्ध्यति यत्पदार्थहृद्योपादानं तत्काव्यशरी यमा॰
रप्रविष्टविशिष्टार्थप्रतिपादकतावच्छेदकयोजितवाक्यनिष्ठानुपूर्व्युपस्थापककाव्यशरीरप्रविष्टशब्दनिष्ठानुपूर्वीवैजात्यं विभिन्नका
व्यताव्यवहारप्रयोजकं न तु शब्दस्यार्थस्य द्वयोरनयोः स्मृहानुपूर्वीव्यक्तेर्वाभेदस्तथा तद्धि सर्वमेव काव्यं यथोक्तव्यवहारविषयः स्याद
र्थविशेषप्रतिपादकतावच्छेदकानुपूर्वीवैजात्यस्य तथात्वेऽपि सम्भवः श्लेषे काव्यभेदव्यवहारापत्तेरित्यर्थस्फोरणायेति तस्य च कारणं क
विगता केवला प्रतिभा सा च काव्यघटनानुकूलपदपदार्थोपस्थितिस्तद्गतं च प्रतिभात्वं काव्यकारणतावच्छेदकतया सिद्धो जातिविशेषः वा
त्वघटितादिना सांकर्यमप्यखण्डोपाधेर्निर्बाधत्वात्तादृशप्रतिभात्वमखण्डं च धर्मद्वयमेकं देवतामहापुरुषप्रसादजन्यादृष्टमेकं च विलक्षणव्युत्प
त्तिकाव्यकरणाभ्यासयोर्जन्यतावच्छेदकं न तु तत्त्रयमेव मिलितं प्रतिभासामान्ये हेतुर्बालादेस्तौ विनापि केवलान्महापुरुषप्रसादादपि प्रति
भोत्पत्तेर्दृष्टत्वात् न च तयोस्तत्र जन्मान्तरीणयोः कल्पनमिति वाच्यम् गौरवान्मानाभावात्कार्यस्यान्यथोपपन्नत्वाच्च लोके हि बलवता प्र
माणेनागमादिना सति कारणताविनिर्णये पश्चादुपस्थितस्य व्यभिचारस्य वारणाय जन्मान्तरीयमन्यथानुपपत्त्या कारणं धर्मादि कल्प
तेऽन्यथा तु व्यभिचारोपस्थित्या सर्वत्र कारणताविनिर्णयेऽश्रमत्वप्रतिपत्तिरेव जायते नापि केवलमदृष्टमेव कारणमित्यपि वदितुं श
क्यम् किंयन्तं चित्कालं काव्यकर्तुमशक्नुवतः कथमपि संजातयोर्व्युत्पत्त्यभ्यासयोस्ततः प्रतिभायाः प्रादुर्भावस्य दर्शनात्तादृशस्थले का

नौका
८
17



रेव तार्भ्यां प्रागपि तस्याः प्रसक्तेः न च शक्तिमात्रप्रतिबन्धकसहस्रेणान्तरमिति वाच्यम् तादृशानेकस्थलगतादृष्टद्वयकल्पनापेक्षया लाघवेन
श्रुताभ्यासयोरेव प्रतिभाहेतुत्वकल्पने लाघवात् तस्मात्तत्तदशक्तस्यापि भगवत्प्रसादादेव कस्यचित् प्रतिभा स्यादिति तत्र अदृष्टस्यैव कारणत्वम्
तिभाया न तावेव तत्र प्रमाणं केवलशिक्षणकाव्यस्येति वा न व्यभिचारः न च सतोरपि व्युत्पत्त्यभ्यासयोर्यत्र न प्रतिभा तत्र तत्त्वनुपपत्त्या व्यभिचार
इति वाच्यम् तत्र तयोस्तादृशयोरेव तद्रूपमानाभावेन कारणतावच्छेदकान्तर्वर्तिनं तत्तत्प्रतिविशेषस्य प्रतिबन्धकत्वकल्पनावश्यकत्वाद्दोषः
प्रतिबन्धकाभावस्य च कारणतायाः सर्वसिद्धत्वात् शब्दादिरूपहेतुतावादिनः शक्तिमात्रहेतुतावादिना अपि विशिष्टप्रतिवादिना मंत्रादिभिः कृते
कतिपयवर्णकत्वम् इव सत्यपि तेषु विहितानेकप्रतिबन्धस्यापि कवेः काव्यानुदयस्य दर्शनात् तदिदं काव्यं चतुर्विधमुत्तमोत्तममुत्तमं म
ध्यममधमं चेति यत्र शब्दार्थौ गुणीभावितात्मानौ कोन्तराह्लादकारिणमर्थमभिव्यङ्क्तः तदाद्यम् परार्थस्य वाच्यसिद्ध्यङ्गस्यापि
व्यङ्ग्यस्य चमत्कारकारितायाः अतिप्रसङ्गवारणाय गुणीभावितात्मानाविति शब्दार्थयोर्विशेषणम् यत्र व्यङ्ग्यं प्राधान्यमिति पूर्वव्यङ्ग्यानि रा
साय लोकोत्तराह्लादकारिणमिति यत्र व्यङ्ग्यमप्रधानमेव सद्दैववशतोदासमप्यभवद्राजकलत्रमिव चमत्कारकारणं तद्द्वितीयम् वाच्यापे
क्षया प्रधानीभूतं व्यङ्ग्यमन्तरा चमत्कारापेक्षया च गुणीभूतं यद्व्यङ्ग्यं तदाद्यम् अनेनापि व्यङ्ग्यस्य प्राधान्यावधारणं नाव्यङ्ग्यवाच्यचित्रातिप्रसङ्गवारणा
य चमत्कारेति यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारः तन्मध्यमम् यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृ
तिः प्रधानं तदधमम् एवमेव यद्यपि यत्रार्थचमत्कारासमानाधिकरणा शब्दचमत्कृतिस्तदधमाधमं काव्यं काव्यविधास्वगणयितं सोऽप्यतम् ।
यथा मम । कोकिलाकलकलैकलिकाकेलीलोलकेकिकुलकेलिकलाङ्केः काकलीकलककाकलकाकलीलैः किंकलाकिलकलोकलिली
लामिति । यदि चात्र कलरवोऽवसन्नकालानुरोधीपितो विपरीतस्वरनाम्नः शृङ्गारोऽपि सहृदयमात्रसात्विकस्य शब्दचमत्कृतौ गुणः कलिती

ममप्रधानशब्दार्थचमत्कारो मध्यमे ; तिव्याप्तिवारणाय उपस्कृतां शब्दचमत्कृतिविशेषणम् ॥

अत्र शब्दार्थचमत्कारभेदेन द्रुतद्वयोरपि कभेदत्वांगीकारे व्यंग्यप्राधान्याप्राधान्यकृतमपि भेदद्वयमीषदंतरभेदतामुपयातीति द्विविधमेव काव्यं भवेदिति निर्विवादं अस्य गौणार्णामात्रमिति विभावनीयम् ४ ४
पुनरुक्तत्वानुपयोगाभ्यां शब्दस्यैव रूपान्तरेणानुप्रतिपादनेऽप्याहाः विरोधवदतिरिक्तसंबंधाभ्यां शब्दस्यैव विरोधाश्रयप्रतिपादनेन तत्त्वः ५ ६

लापदमपि कथंचित्तदनुगुणमेवेत्याग्रहात्तदर्थमेवेत्युच्यते तदापि तारतारतरैरैरैरुत्तरोत्तरतोरुतैः इत्यादौ तिर्यग्गौतिनीरेतीरेतरो
तद्वाविति तिर्यग्रुतानामर्थकल्पनमेवमेकाक्षरादौ तु निपटबन्धादिमहाकविनिबद्धं तथ्यादृष्टव्यम् तथापि रमणीयार्थप्रतिपादकशब्दस्वरू
पकाव्यसामान्यलक्षणयोगादस्त्वतः काव्यत्वाभावेन प्राचीनपरंपरामात्रमनुरुन्धानैर्महाकविभिस्तत्रतत्र काव्ये निबद्धमपि नैवोन्नीत
दिति मन्तव्यम् तत्राद्यप्रभेदात्मकामहत्वप्रभेदस्य ध्वनेः सामान्यतः केचन भेदा उच्यन्ते ध्वनिस्तावद्द्विविधः अभिधामूलो लक्षणामूल
श्च तत्राद्यस्त्रिविधो रसवस्त्वलङ्कारभेदात् रसध्वनिरिय लक्ष्यक्रमोपलक्षणात् रसभावतदाभासभावशान्तिभावोदयभावसन्धिभावश
बलतानां ग्रहणम् द्वितीयश्च द्विविधोऽर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्च एवं पञ्चविधे ध्वनौ परमरमणीयतया सकलमूर्धन्यो
रसध्वनिरिति रसएव समपञ्चं ग्रन्थकृता निरूपितस्त्वलमतिविस्तरेण ॥ ॥ नाट्ये च परं तद्द्वयोरप्यानन्दरूपता तत्तु मानोरथि
को रसनप्रसिद्ध इति चेत्सत्यम् अस्माकं तु मनोरथोपरचितप्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषामायुः परिक्षीयत इत्या
दौ मानोरथिकः शृंगारश्रवणात् शास्त्रे स एव सप्तैवेति व्यग्रणनाच्च रसेन विना च सत्त्वोऽनुपात्तैरिति तत्र विशेषाः यदाह भरतः शृंगार
हास्यकरुणरौद्रवीरभयानकाः बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः सकलाधिदैवतं विष्णुः स च शृंगारस्यापि दैवतं तेन सकला
कारूणविषयत्वेनानुध्यानतया च प्रथमं शृङ्गारोपन्यासः ॥ ॥ नाट्ये चेति नाट्यनामाहार्याद्यभिनयचतुष्टयम् स्वाभिकमानोरथि
कयोर्दुःखाद्यात्मकत्वेपि काव्यनाट्ययोरेकएव रसस्स्यात् परं त्विति अस्माकं त्विति धन्यानां गिरिकन्दरे निवसतां ज्योतिः परं ध्यायता
मानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्केशयाः इति पूर्वार्द्धम् श्लोकार्थः स्पष्टः विप्रतिपन्नं प्रत्यर्थं तत्त्वमाचष्टे शास्त्र इति यद्भूत एवैको
रसः रतिनारायणप्रभृतयः शृङ्गार एव रस इति केचिदालङ्कारिकाः तेहाहरशैतिचाप्याधुनिककवयस्तत्सर्वमप्रक्रममिति दर्शयिष्यन्नि

वीभत्साद्भुतमंत्रौ चेति॥

चरत्वर्यः

टीका वक्तितार्थं दर्शयति नत्वविशेषा इति चत्वरमर्थः नाड्रेत्याह्यविति, तथाचकाव्येष्वेतावत्तरस्यविवादमित्यभिप्राय: सकलाधिदैवतं जगद्‌
१२ त्तरात्मा सच शृङ्गारस्यापि दैवतमिति नतु किंनामविसो शृङ्गारदेवतात्वम्‌ एव निखिलाश्रितत्वालम्बनत्वे सति देवतात्वं तत्त्वमित्येके
18 निखिलविषयरत्याश्रयत्वे सति देवतात्वं तत्त्वमित्यन्ये तत्तत्स्थायिमयप्रकृतिकत्वे सति देवतात्वं तत्त्वमिति बद्धवः ॥ ॥ ननु वात्स
ल्यलौल्यभक्तिः कार्पण्यं वा कथं न रसः आर्द्रताभिलाषश्रद्धास्पृहाणां स्थायिभावानां तत्त्वसत्त्वादिति चेन्न तेषां व्यभिचारिरत्यात्मकत्वात्‌।
ननु कस्य रसस्य ते व्यभिचारिभावा भवेयुरिति चेत्सत्यम्‌ वात्सल्ये करुण एव रसो लौल्ये हास्यो भक्तौ शान्तः कार्पण्ये हास्यः नन्वेवं परत्वकल्प
नत्वादत्र व्यभिचारित्वेनावश्यकत्वाद्धर्मिकल्पनातो धर्मकल्पनाया लघुत्वाच्च व्यभिचारिणी रतिरेवास्तु किं करुणेनेति चेन्न इतेः शोक इति
शोककारणतायां रतेरुपपत्त्या ॥ ॥ द्वादशरसवादिमतमपाकर्तुं शङ्कते नन्विति एतेषां प्रतिनियतस्थायिभावानाम्‌ आर्द्र
करुणत्वे विप्रलम्भे तेति समाधत्ते तेषामिति स्वयं रसाभावे रतेर्व्यभिचारिताप्रसंगतैवेति मत्वा एच्छति नन्विति उत्तरयति वात्सल्य इति इयं च सति सप्तमी
नित्येक्षः एवमग्रेऽपि तथापि संख्यानियमस्तु दुष्कल्पः स्यादेवेति शङ्कते नन्वेवमिति परत्र शृङ्गारे अत्र करुणे धर्मिकल्पनातः प्रधानरसान्तर
कल्पनातः धर्मकल्पनायाः गुणतया वश्यकस्य रतिमात्रकल्पनायाः लघुत्वात्‌ एकमात्रविषयत्वात्‌ उपपत्त्यादिति तथाच करुण
चर्वणापर्यन्तं रतेरसत्त्वान्न रत्याः शोकोऽगतार्थ इति भावः ॥ ॥ किंच रतेः कस्य रसस्य व्यभिचारित्वं न शृङ्गारहास्यरौद्रवीराणां युगपन्मिथु
नपरस्परप्रीतिहासक्रोधानन्दानां तत्राभावात्‌ न बीभत्सस्य जुगुप्सायास्तत्राभावात्‌ नाद्भुतस्य विस्मयस्थायितत्रास्थिरत्वात्‌ तस्मा
च्छोकस्य स्थायितया शोकस्थायिभावकः करुणाख्यो तिरिक्तो रस इति ननु रतिरेवास्तु किं हास्येनेति चेत्कस्यासौ व्यभिचारिणी करुण
रौद्रवीरभयानकबीभत्सानां तत्रानवकाशात्‌ नाद्भुतस्य विस्मयस्य तत्रास्थिरत्वात्‌ न शृङ्गारस्य रतेः स्थायित्वाभावात्‌ परं तु रत्यास
एते

इहास्यस्य सांकर्यम् ननु रतिहास्ययोरसंकीर्णस्थलाभावात्स्पष्टं कथं स्यादिति चेन्न हेतोरसाधारण्यादसाधारण्यमत्र स्थायित्वम् यथा र-
तिसांकर्येऽपि स्थायिशोकादसाधारणात्कारणात्करुणो भिद्यते तथा वीरसांकर्येऽपि स्थायिहासभावादसाधारणात्कारणात्करुणो भिद्यते तथा
तत्सांकर्येऽपि स्थायिहासभावादसाधारणात्कारणाद्धास्यो भिद्यते शान्तेऽप्येवमूह्यम् नचवात्सल्यादावपि साधारणहेतव आर्द्रतादयः सन्ते
ति वेतेषामपि रसत्वापत्तिरिति वाच्यम् आर्द्रतादीनामपि रतित्वात् ॥ ॥ करुणं विना रतेर्व्यभिचारितापि नोपपद्यते रत्याद किंचेति आ-
नंदानामित्युत्साहहानामित्यर्थः कचिन्नत्थैवपाठः तन्नस्थायिनामिति शेषः अस्थिरत्वादिति विद्युद्द्योतप्रायत्वादिति भावः उपसंहरति
हास्ययोः तस्मादिति यद्यपि करुणन्याये निर्देष्टुं शक्यस्तथाप्यधिकं वक्तुं पृथगाशङ्कते नन्विति रतिकरुणयोरेकतरव्यभिचारवद्रतिहास्य
यमेव योरेकतरव्यभिचारस्याप्यभावे कथं पार्थक्यमित्याशङ्कते नन्विति स्थायिभावभेदे रससांकर्यं न दोषायेत्यभिप्रेत्य समाधत्ते हेतोरिति
स्थायित्वमिति येनः अन्येनाभिव्यक्तिरित्यर्थः अभिप्रायं विशदयति यथेति उक्तन्यायमन्यत्रातिदिशति शान्तेऽपीति एवं रसभेदं विना
रतेर्व्यभिचारित्वानिर्वचनम् ऊह्यमिति रतेरिवविस्मयस्याप्यस्थिरत्वादन्येषामसंभवादिति भावः स्थाय्यसाधारण्यं प्रकृतेऽपीति शङ्क-
ते नचेति रतित्वादिति तथा च न तस्या वात्सल्यस्थायित्वमिति भावः ॥ ॥ अत्र विप्रतिपन्नं प्रत्याह ॥ तस्माच्च नत्रासाधारण्ये
शृंगाररसत्वापत्तिः ननूत्साहक्रोधावुभयत्र तस्माद्वीररौद्रयोरन्यतररस एव रसो वक्तव्यः नानामिति चेन्न स्थायिभेदेन भेदात् उत्साहवासना
वीरे न तु रौद्रे क्रोधवासना रौद्रे न तु वीरे इति ॥ । तस्माच्चेति शृङ्गाररसत्वापत्तिरिति न च स्त्रीपुंसविषयत्वाभावे कथं शृंगाररसत्व-
मिति वाच्यम् रतिसंभूतस्त्रीपुंसविषयकशोकप्रकृतिकतया वश्यकल्प्य करुणपोषकरतित्वेनैवोपपत्तेः रसान्तरे मानाभावादित्याश-
यः ननु तत्रैव रतिप्रकृतिकत्वं तत्संभूतशोकप्रकृतिकत्वं वेत्यत्र विनिगमनाविरह इति चेद्रसान्तरे विजातीयप्रकृतिकत्वेसंभवतिसति

अधिकाशंकाम्
भिकामात्रयति
परं विनि ...
भयःसरूचारः

सत्वसिद्धिरितिसूत्रविहितप्रत्ययान्तेन तदेकशेषोऽन्यथा तल्लक्षमात्रकृतविशेषाभावे नैकशेषप्रसक्तेः ८

नौका
१५
१७
रौद्रे

रसान्तरप्रकृतिप्रकृतिकत्वस्य नैव विभावानुभावैः सहिजातीयप्रकृतिकत्वस्याध्यवसायाच्चेति तदिदमुक्तमुपलक्षयादिति स्वरूपमतो रु
त्साहक्रोधयोरविनाभावादेकतरव्यभिचारित्वमेव युक्तमित्याशङ्कते नन्विति समाधत्ते स्थायिभेदेनेति वीरे क्रोधस्य व्यभिचारित्वेपि रौ
द्रे स्थायित्वादुत्साहस्य क्रोधे व्यभिचारित्वेपि वीरे स्थायित्वादिति निगन्तुमशक्यत्वाच्च द्वयोरप्यविप्रतिपन्नत्वमित्याहोत्साहेत्यादि ॥ ॥ यू
नोः परस्परं परिपूर्णः प्रमोदः सम्यक्परिपूर्णो रतिभावो वा शृङ्गारः यूनोरेकस्य प्रमोदस्योराधिक्येन न्यूनतायां व्यतिरेके वा परिपूर्णत्वेरभावा
द्रसाभास इति सच द्विविधः संभोगो विप्रलम्भश्च तत्र दर्शनस्पर्शनसंलापादिभिरितरेतरमनुभूयमानं सुखं परस्परसंयोगेनोत्पद्य
मानश्चानन्दो वा संभोगः संयोगो बहिरिन्द्रियसंबन्धः ॥ ॥ स्थाय्यवच्छिन्नानन्दस्यानन्दावच्छिन्नस्थायिनो वा रसपदार्थत्वयोक्तत्वात्त
दनुसारेण शृङ्गारं लक्षयति यूनोरिति युवा च युवतिश्च युवानौ तयोः परस्परं परिपूर्णः परस्परयथोचितविभावानुभावव्यभिचारिभि
रनन्तरत्वविच्छिन्नः प्रमोद आनन्दः सम्यगिति औचित्येन परिपूर्णः विभावानुभावव्यभिचारिभिर्भूषावरणविधिशिष्टो रतिभावः रतिस्थायि
धर्मभयपत्यौचित्यवदनाप्रयोजनं दर्शयति यूनोरिति यूनोर्मध्ये तं विभजते सचेति संभोगं लक्षयति तत्रेति तयोर्मध्ये दर्शनेत्यादि
यत्र दर्शनादीनामन्यतमत्वेन प्रवेशापेतयालावबाहाद परस्परेति संयोग इति एतेनानाश्लिष्टयोरपि संभोगव्यवहारः सूपपादः बहिरि
न्द्रियसंबन्धमात्रस्यापि संभोगत्वे तदेकतराभिमानभङ्गेन विप्रलम्भव्यवहारोऽदुर्लभ इति विशेषः ॥ ॥ अस्यैव तं विस्तरं वर्णः प्रयामः
यथा लोभेन चाटुवचनानि पराङ्मुखानि पाणिः पयोधरगतो जडतां जगाम तस्याः परं तदपि वेपथुरेव नीवीविसंसयन्त्र हृदभून्मधुसूदनस्य
यथा वा निद्रालोचनमुन्नमय्य वदनं कान्तेऽन्तिके चान्तरः स्पृशिस्वस्तवाससुकूलदर्शितवलिप्रव्यक्तनाभिश्रियः राधायाः दरहूर्णदुग्धकलटलद्दो
र्णीमदद्रोहिभिर्हे क्षेणस्मन्तरंगितैर्विरचितोदीर्णोग्रेववः स्मरः १ ॥ ॥ वर्णश्यामरति यद्यप्यमृतत्वाद्रसे वर्णसंभावनानास्ति तथापि

संभोगोपि विप्रलं
भव्यवहारस्य सूपपाद
इति लक्षितम्

वस्तुतस्तु फलोपहिता फलोपधायकसामग्रीसमवहिता रतिः किंवा द्विविधरसवच्छिन्नस्थिदानंदो द्विविधः संभोगश्लिन्नतलक्षणमयं अन्यं सोदाहरणभेदानुसारेण मतमाश्रयकमतीत्रिसारः ८

तत्रैवतामिरभेदात्पृथक्सायाहतीयव्यवहारः कार्यविदामितिमन्तव्यम् स्तोभेनेति यद्यपिमधुसूदनस्यचाटुवचनानिप्रियवाक्यानिस्तो
भेनप्रलयस्वरभङ्गादिसात्विकभावसंपातेनपराहतानिप्रतिबद्धानिबभूवुः क्वचित्स्तम्भेनेतिपाठः सतुप्रागुक्तोलतागालग्नितेस्तम्भेव
चनप्रतिबन्धकत्वस्याउभयवाधितत्वात्ग्राम्यादिकमेव यद्दिचतस्याः प्रामात्यप्यग्रेहस्तादाक्रियासामान्यप्रतिबन्धकत्वस्यस्तम्भलक्ष
णत्वात्निघ्नायेत्याद्योजनीयस्तच्चोक्तमधस्तात् किंचपाणिः पयोधरगतःसन्जडतांजाड्यंजगाममप्रायः परं तत्रलत्याः पृथुवेपथुरेवसहायः
कम्पोनीवीमोक्षाविलम्बात्स्तम्भप्रसक्तेविस्रंसयन्नोचयन्नहृद्यमधुसूदनस्यतत्पक्षेनेतत्कार्यकारीतिभावोभूज्जातस्मर्थः ना
यकारस्त्वंसंभोगसुखाहस्तानायिकारत्वमपेनसुखाहरति निघ्नाणोत्तराणामिति निघ्नारोनिद्राम्यकलितैर्हेलोचत्तमीयस्यतथावहन्नमुखन्
मध्याहैः कृत्वाकान्तेश्रीकृष्णेकचान्तःस्थितिस्तनात्तरालनिहिताग्रहस्तेसतस्यचपरकीयान्तःकरणपरीत्यामात्रार्थकमार्गिकायदिकाष
तैपमसशीलाङ्कनकुशिप्रतिपतिमात्रपरत्वान्नायकास्वेतशङ्काकात्त्वशङ्कामावहेथाः कथंवान्यथालावण्यमार्यकैर्येयाः प्राप्तोस्त
नंशिथिलीभूतंपश्चाद्धस्तंगलितंयदुकूलंतेनदर्शितायावलेस्त्रिवलेः प्रथमकायाप्रकटायानाभेस्त्रश्रीर्यस्यास्ताहस्यराधायाद्दरेति ई
घत्कंपमानकमलपत्रपुटगर्वासहिष्णुभिर्लज्जालोलैरितियावद्दक्कोणस्यतरंगितैरपाङ्गपातैः कटाक्षैः स्मरःकामोदीर्घायुरेवाति
भूमिंगतएवविरचितः कृतस्मर्थः ॥ ॥ देशानां समयानां नायिकानां चभेदेननायकयोरवस्थाभेदेनचवहवोभेदास्तेचरसमंज
र्यांविशेषतोदर्शितास्ततपुनर्विस्तरभियानप्रदर्श्यन्तइति ॥ ॥ इत्थमनेकविधोपिएकएवगणपतस्माह देशानामिति नायक
योरिति उमान्विदेत्येकशेषः यद्यपिनायिकायाएवावस्थाभेदेनभेदोननायकस्यानुपारख्यातादिभेदजीवात्वपरपुंभोगचिह्नि
तत्वस्यादिनायिकायामुग्धाववेनेतितरामनोचितेनरसाभासापत्तिरित्यादिरसमंजर्यांप्रपञ्चितम् तथाप्यत्रावस्थापदेनाजहत्स्वार्थलक्ष
यद्यप्येवमुभयारप्यवस्थापिसंभवति यथाममपतुलंतेताभिमुखीभवन्तीगुणात्मतंतोतिवलत्स्वभाजः स्वयंश्रियस्याथरमापिवंतीस्वकंचयापाययते
कृनाता इत्याद्यविकृतनास्त्रात्तस्यानथ्यवसायात्रयापिर्न २

नौका
२०
२०

णया नायकभेदनियामकस्वभावपर्वोपलक्ष्यतां नैतावता किञ्चिदपहीयते ग्रन्थकृतः ॥ ॥ अत्रैव प्रसंगाद्धावान्निरूपयितुं प्रतिजानीते ।
॥ अथेति । अथ हावा निरूप्यन्ते तत्र भरतः लीला विलासो विच्छित्तिर्विभ्रमः किलकिंचितम् मोट्टायितं कुट्टमितं विब्बोको ललितं तथा बोधितादिप्राप्ति
विहृतं चेति विज्ञेया दश हावास्तु योषिताम् नारीणां शृङ्गारचेष्टा हावः स च स्वभावजो नारीणाम् ॥ ॥ तानुद्दिशति तत्र भरतेति सा लक्षणनिर्देशः
मान्यतो लक्षयति नारीणामिति नारीसंबन्धीत्यर्थः इदं च स्वरूपकीर्तनम् तेन नन्वविब्बोकेसादित्यन्यसंगतिः शृङ्गारचेष्टेति संभोगशृ
ङ्गारस्य यो व्यापारविशेषस्तत्त्वर्थः आनुगुण्यं च पौर्वापर्येण संबन्धित्वमानुगुण्येन व्यवक्रियमाणत्वं वेत्यन्यदेतत् स्वभावजो नारीणामि
ति नारीस्वभावविशेषनियुक्तस्त्वर्थः न तु नारीजातिनियत इति भावः ॥ ॥ ननु विब्बोकविलासविच्छित्तिविभ्रमाः पुरुषाणामपि सं
भवन्तीति चेत्सत्यम् तेषां त्वौपाधिकाः स्वभावजाः स्त्रीणामेव नन्वेवं यदि तासां सदैव ते कथं न भवन्तीति चेत्सत्यमुद्दीपकान्वयव्यतिरे
काभ्यां नाधिकानां हावाविर्भावतिरोभावाविति ॥ ॥ अत्रैव शंकते नन्विति उत्तरयति तेषामिति औपाधिका उद्दीपकनिष्ठा तत्स्वरू
सत्ता० पोपाधिसत्तानियतसत्ताकाः स्वभावजा उद्दीपकस्वरूपमात्रनियतसत्ताकाः आशयमविद्वानाशङ्कते नन्वेवं यदीत्येवं मन्यते चेदित्य
र्थः कथमिति स्वभावस्य चिरन्तनत्वादिति भावः आशयमुद्घाट्य समाधत्ते सत्यमिति उद्दीपकेति उद्दीपकस्वरूपमात्रेत्यर्थः पुरुषाणा
चोद्दीपका निशायामन्वयव्यतिरेकाभ्यां तावदितिशेषः ॥ लीलाविलासविच्छित्तिविभ्रमललितानि शारीराणि मोट्टायितकुट्टमितविब्बो
कविहृतान्यान्तराणि किलकिंचितमुभयसंकीर्णमिति प्रियभूषणवचनाद्यनुकृतिर्लीला तत्र विभावः सखीकौतुककलापः अनुभा कला०
वः प्रियपरिहासः यथा चरणे शौचरमाद्रिचुंबितिमनोजितासितं सुभ्रुवां मज्जत्कौतुकयातयाविरचिते वंशीरवेराधया प्रपस्फु
र्जेतिकस्य निःस्वनरतिक्रोधाद्दृजन्कानने राधां वीक्ष्य लतान्तप्रतानपिहितां स्मेरो हरिः पातु नः ॥ ॥ तान्विभजते शारीराणीति शारी

रमात्राश्रितानीत्यर्थः अन्तराणि मनोमात्राश्रितानीत्यर्थः उभयसंकीर्णमिति श्रमस्य शारीरत्वादभिलाषस्यान्तरत्वाद्गर्वस्मितहर्षभयक्रोधानां-
स्वरूपतस्तथात्वेऽप्यान्तरत्वात्फलतस्तथात्वे शारीरत्वान्नेदं तदन्यतमव्यवहितसमुदायात्मकं किल किंचितस्योभयसंकीर्णत्वमित्याशयः तत्र प्रथमो-
द्दिष्टत्वाल्लीलां लक्षयति प्रियेति विभावउद्दीपकमनुभावस्तत्स्वरूपस्य हेश्यमेवमग्रेऽपि सर्वत्र बोध्यम् । चण्डांशाविति चण्डांशौ तिग्मरोचिषि
चरमाद्रिचुम्बिन्यस्तं याते सति सख्युर्वा नायिकानां मनोज्ञः करणैर्हृतिं जिता सितं परीहितं सख्या कौतुकया संजाते छद्मया प्रौढया राधया वंशीरवे
मुरलीनादे विरचिते कृते सति एषकस्य निःस्वनः केन कृतो वंशीरव इति क्रोधादमर्षेण कान्तं नन्दराधाधिष्ठितं ब्रजजनाच्छन्नतावशलाकापिहितां-
वितनलताकुञ्जां राधां वीक्ष्य स्मेरो हसन्हरिर्नोऽस्मान्पातु रक्षत्वित्यर्थः ॥ ॥ विलासं लक्षयति ॥ ॥ गमननयनवदनभ्रूप्रभृतीनां यः कश्चि-
दुत्पद्यते विशेषः स विलासः अत्र विभावाः प्रियदर्शनस्मरणादयः अनुभावा अभिलाषवैदग्ध्यप्रकाशनादयः । यथा कूजत्कांचिदरस्फुरद्व-
लिनटद्भ्रूवल्लिवेल्लद्दृगुर्वल्लत्कुण्डलकान्तिसाचिवलितग्रीवं लपन्त्या वचः प्रातर्नर्त्तितपुण्डरीकपरिषत्पाण्डित्यपारङ्गरीदृष्टिर्यं प्रतिजायते व-
रतनोर्वक्रासशङ्काधिकः ॥ ॥ विलासं लक्षयति गमनेति कूजदिति कूजंती शब्दायमाना कांची मेखला यत्र दरमीषत्स्फुरन्ती वलिस्त्रिवलि-
र्यत्र नटन्ती चंचला भ्रूवल्ली वल्लीसदृशी भ्रूर्यत्र वेल्लद्दलाद्दृशः शरीरं यत्र वलान्स्वहेल्लन्ती कुण्डलकान्तिः कर्णभूषणशोभा यत्र साचिवक्रं वलिता कृता
ग्रीवा यत्र कर्मणि यथा भवति तथा वचो वचनं लपन्त्या वदन्त्या वरतनोः सुन्दर्याः प्रातरिति प्रातःकाले नर्त्तितानि वायुचलितान्येतेन क्रियावि-
शेषणं निर्दिष्टार्थंविंबभ्रुतताः स्मिन्नावेदितानि यानि पुण्डरीकाणि सितोत्पलानि तेन मुखप्रसादो व्यंग्यः तेषां परिषत् सभा याः पाण्डित्यस्य
शोभायाः पारञ्चरी समयदर्शी दृष्टिर्यं प्रतियस्य दृश्यवक्त्रा जायते सशङ्काधिकोऽन्यायासेन स्वर्गफलाभिव्यक्त्योदित्यर्थः ॥ विच्छित्तिं लक्ष-
यति ॥ ॥ कतिपयभूषणविन्यासो विच्छित्तिः तत्र विभावाः सौकुमार्यप्रियसौभाग्यसौन्दर्यगर्वक्रोधक्लेशादयः अनुभावा गर्वमानक्लेशप्र

मौका
२९
२।

काशनादयः यथा । केयूरं न करे पदे न कटकं मौलौ न माला पुनः कस्तूरीतिलकं न तथापि तनुते संसारसारां श्रियम् सर्वाधिकामले ।
त्विभालफलके यद्वेधसा सम्भृतो जानीमः किमु तन्नयमन्मथमहीपालेन मुद्राकृता ॥ कतिपयेति केयूरमिति यद्यपि केयूरं बाहुभूषणं
करे न कृतं पदे कटकं नूपुरं न मौलौ मस्तके माला न तथापि कस्तूरीतिलकं ललाटस्थं संसारसारां सर्वातिशायिनीं श्रियं शोभां तनुते
तन्नो मेघाते वेधसा ब्रह्मणा सम्भृतो सारमधारोद्धं ललाटफलके यदिति किं यद्विशेषणं सर्वाधिकं ललनाकुलमणिनवमलोत्विनरले
त्विमन्मथमहीपालेन कामदेवेन यस्मिन्मधारोद्धं कस्तूरीतिलकरूपामुद्रायाया चार्थ प्रतिपन्नये कृता किं स्विति वयं जानीमो न स्विन्नमरम्य मुवं
र्थः ॥ ॥ विभ्रमं लक्षयति ॥ वागङ्गभूषणानां स्थानविपर्यासो विभ्रमः तत्र विभावाः धनमदरागोत्कण्ठादयः अनुभावाः स्त्रियसत्योपु
पहासादयः । यथा । त्यक्त्वा केलिविधौ निजांशुकधिया पीताम्बरं सांशुकं पश्यायाः परिधाय सम्भ्रमवशायनात्मनः प्रयाता बहिः मादातं
वसनाञ्चलं चपलयत्कोपं हशाद्दर्शयन्वाचा कौतुकमाचरन्स्मितसुधास्निग्धो हरिः पातु नः ॥ ॥ वागिति मन्त्ररति केलिविधौ क्री
डाप्रसङ्गे निजांशुके वसिते पीताम्बरस्यापीन कस्त्वसांशुकपरिधानीयं निजांशुकधिया स्वपरिधानीयबुद्ध्या परिधाय प्राहत्य सम्भ्रमवशायनात्मनः प्रापयं
क्रान्त्वा याया पातरुषसि बहिर्गन्तुमागच्छन्त्याः पश्यायाः कथिन्या सकाशाद्दातृमर्यादात्त्वीयं गरहीतं वसनाञ्चलं मर्यादातन्वस्थिनं न तदीयंप
रिधानीयं चपलयन्निदं त्वदीयमिति दर्शयंस्तावत्तानातेच यत्कोपं तस्याः कोपं हशाद्दर्शयन्लोचनान्तरु तथमाविष्कुर्वन्वाचा त्वमपराधकरा त्वं
रयाः कौतुकमाचरं स्ते कोपहासास्पदीयवैस्मितनसुधास्निग्धो हास्यरसमसंभृतान्तः करणो हरिर्नौस्मान्पातु रक्षतु विलम्बयेः ॥ ॥
किलकिञ्चितं लक्षयति ॥ ॥ श्रमाभिलाषगर्वस्मितहर्षभयक्रोधानां संकरः किलकिञ्चितम् तदाहुः श्रमाभिलाषगर्वो हासस्मि
तहर्षभयक्रुधाम् असकृत्सङ्करः प्रीतैर्विज्ञेयं किलकिञ्चितमिति अत्र विभावाः । नवयौवनोद्भेदचाञ्चल्यादयः अनुभावाः कर्णाञ्जलि

पूर्वोपरीत्ला... वप्रतितावयविनीति यावत् ४

लोकान्तरा... तिष्ठतीति तत्र यत्नितिया वत् ४

ग्राम्यसिकको... निदानदेवलेना... पीयमवचुस्थितमिता... निर्षेवलोचनाकोच... ताहार्दं

२९

हीरणादयः । यथा । कोदण्डमारोहति चाडिमानं मधुव्रतः कांतनिशोणिमानम् पत्रं स्वयं वर्षनिवेपमानं स्वर्णं चलः स्विद्यति किं निदानम् ।
यथा वा क्रोधागारसमुत्थिताः समुदयत्संत्रासशैलार्दिताः ब्रीडाभिः परिमर्दिताः स्मितलसद्धाराभिरुद्दर्शिताः स्नाताः स्वेदरसैर्मनोभवकला
मालाभिराभूषिताः पायासुर्मे यियोलराजदृदिताः स्फीताः कटाक्षच्छटाः ॥ ॥ अत्रेति अत्र गात्रगौरवादिरभिलाषरङ्गगर्वस्मितहर्ष
भयक्रोधाः स्वस्वप्रकरणे लक्षिताः शुष्कोवा तेषामनुभावा गौणएव वा तेषां संकरोन्यतमसामानाधिकरण्यं तत्रसमतिमाह तदाङ्करिति
अनुभावविवक्षयोदाहरति कोदण्डमिति तन्नेत्रेनाध्यवसितं भ्रूकुटियुगलं च ताडमानं कौटिल्यमारोहति भजते एतेन गर्वानुभावश्चक्तः म
धुव्रतस्तन्नेत्रेनाध्यवसितश्चक्षुः शोणिमानं लौहित्यं कांतनिधत्ते एतेन क्रोधानुभावश्चक्तः पत्रं तन्नेत्रेनाध्यवसितं वक्त्रं स्वयं प्रसादं वर्षंनिप्रक
टयति एतेन हासानुभावश्चक्तः कीदृशं पत्रं वेपमानं प्रकम्पमानमेतेन भयानुभावश्चक्तः स्वर्णं च तल्लत्वेनाध्यवसितं कुचमण्डलं स्विद्यति
एतेन हर्षानुभावश्चक्तः अत्र किं निदानं कोहेतुरिति कामयमानस्य तत्याभूतेनापि कापि स्तुक्तिः सतिसम्भवे सर्वेषामपि साकर्यं तच्चेति वक्तुं श
त्वाविवक्षयोदाहरणान्तरमाह क्रोधेति क्रोध एव विनाभावादागारं तयाध्यवसितलोचनसमुद्भवाः समुदयन्त्युत्कालाविर्भूतो यः संत्रासो
भयं सएव शैलस्तेनार्दिताः मथ्येरुदाब्रीडाभिर्वैः परिमर्दिताः स्पृष्टाः स्मितस्य धाराभिरुद्दर्शिताः स्वेदरसैरभिलाषैः स्नाता मनोभव
कलामालाभिः कामोद्दीपनचतुररचनापरंपराभिर्गर्वातिशयादाभूषिताः स्फीताः अथ भराट्ठे रराजद्रदिता दृश्यमालयस्तायाः पार्व
णाः कटाक्षच्छटा अपाङ्गपतनानि मयि पायासुः पान्तुः पायासुरिति पाठे अभावविक्षाभूयासुरित्यर्थः ॥ ॥ मोट्टायितं लक्षय
ति ॥ ॥ वार्तावेषस्येति निभृतभूयो दर्शनस्पृहा मोट्टायितम् अत्र विभावाः सपत्नीत्रासलज्जादयः अनुभावा मनःप्रेमकथनसं
केतनिवेदनादयः यथा । नरेहस्य कथारसं कथमपि श्रोतुं समुत्कण्ठते राधा किं तु विकीर्णदन्तकपराङ्गन्सौधाद्धदिः दन्त्यन्ते

कृपटं वपुर्वेषजिहासानुरिति रुद्रस्योक्तिः ।

नै॰ का॰ तस्फुरत्कचद्वारिस्वेदोत्तसद्दोस्तरिव्याबलाङ्गुकृतिस्खलत्सुरिष्ठनः कृसान्निके भाम्यति ॥ ॥ वागिति वागादिव्यापारविषयकद्वेषव
२२ त्वेसतीत्यर्थः निभृतेति हस्तापरिचितेत्यर्थः दर्शनेति हग्व्यापारस्त्यर्थः त्वस्त्रहस्येति रायास्त्रिहस्यप्रश्नाः कथारसंरस्यमानां कथां स
२२ त्योरिभिर्निवेदितामित्यर्थात कथमपिसखीदातित्येसत्यपिश्रोत्रमाकर्णितेतिनसम्यक्एवतेनेछति एतेनद्वेषाज्ञावेदितः विकी
र्लस्यगलितस्यारत्तस्यभुद्रादिरवचितस्यकपरायासात एतेनसंभ्रमिः स्रचितासोधाद्दशहद्दिरेत्यन्तत्यन्नीनेत्रपुटीयत्रस्फुरन्तीकुचवटी
प्रतो॰ यत्रस्वेदेनोल्लसन्तीलद्यास्वेदयुक्तेतियावद्दोस्तटीबाहुद्वयत्रविशेषेणसमन्ताद्गल्वन्नीभ्रकुटीयत्रस्खलन्नीकटिपटीयत्रकर्मत्मिपयाभवति
तथाकृसान्निके पत्नः कृसस्समीपेतत्राम्यतिव्यावर्त्ततइत्यर्थः ॥ ॥ कुहमितंललयति ॥ सुखेदुःखेचेष्टाकुहमितम् अत्रविभावारा
गोत्कण्ठप्रदर्शनकरजनत्वकुन्तलाधरग्रहादयः अनुभावाः कपटकायसंकोचकपटसीत्कारादयः यथा रोद्धुंपाणिः प्रचलतिचिरा
ङ्गुलिर्निश्चलासोभ्रूविक्षेपोभवतिकुटिलोनेत्रमन्तः प्रसन्नम् गाढास्लेषेजयतितनोरर्द्धमात्रेणकारः कम्पोन्द्रः प्रसरतिप्रवेसम्भ्रवेन
प्रयाति । गर्वाभिमानसंभूतोविकारोनादरात्मा विब्बोकः अत्रविभावाः यौवनमदधनमदकुलमदप्रियापराधादयः अनुभावाअवहि
त्थदुर्वचनदुःप्रेक्षणादयः यथा कृताञ्जलिः कातरदृष्टिपातः प्रणेत्सुखः पार्श्वमुपाजगाम सखीमुखेकृणुलत्वरेखामिषापुनः प्रेक्षित
माचकान्त । सकलांगसमीचीनविन्यासोललितम् यत्रैवस्मितादयोनभवंति तत्रविभावामनः प्रसादप्रियतमदृगनुरागधीरत्वादयः ।
अनुभावाः प्रियवशीकरणालोकानुरागचमत्कारादयः ॥ ॥ सद्वदतिरोद्धुमिति नीविकामोचनेस्तनयोः पाणीरोद्धुं प्रचलतिपरंतु
विरात्चिरकालमसौरोद्धुंप्रवृत्ताङ्गुलिर्निश्चलानिरोधनमव्यापारसत्यापयोधरस्पर्शेभ्रूविक्षेपः स्तनयोरिपयाप्यत्रघर्षणेत्भूप्यासः कुटिलो
वक्रोभवति नेत्रमन्तः प्रसन्नमान्तरस्तलोभिमप्रकृष्मादयुक्तंगाढास्लेषेसतनोर्नकारोर्द्धमात्रेलब्धप्रयुक्तोजयतिविलसलोभवतिसाभा

विहृतेवस्यमाल
शिति तिता यत्रुतंय
याः ४

आङ्कदेतिन निद्धाम्सर्वेकयत्वादित्याशयः जयतीतिस्थाने भवतीति प्रक्रमानुरोधी पाठस्तत्र नकारो भवतिपरत्व द्दमात्र रतियोजनात् ।
ग्रामनुरोम्पहृष्टः कंपः प्रसरतिमुखे तसंमुखे न प्रयातिसंमुखो वलोकनेन नायकेहो गमर्य मेव प्रतिषेधयदियान्यत्रासंमुखेन तायां तफलितेवेद्यो ३
गे जातिस्वाभाव्याद्यानो पिप्रतिषेधो ॥ किंचित्करणवसंपद्यतरतीह सितिहिपसम्भ्रहे वेमर्थः विबोकललतयति गर्वेति युनादरात्मानिरः
क्रियारूपः कन्तालिरिति कान्तरो भयचकितो नाद्रियतो यस्यैवं भूतः प्राणेश्वरः कृतांजलिर्बद्धकरपुटः सन्नस्याः पार्श्वे स्थितः समीपेन
तसंमुखेन उपाजगामेषा पुनरेषा तसखीमुखे स्थितां कुण्डलरत्नरेखां तदृष्टुं रवचितवैदूर्यादिकान्निष्टेति तद्दष्टुमाचकाङ्क्षे येषु त्यर्थः ।
ललितेललितयति सकलेति सकलानां समीचीनतया विन्यासः प्रसाधनमित्यर्थः स्मितस्याधिक्यमापरहार्नि राचहे सखेति ॥
यथा कलङ्कितामेवेलंचपलचारुनेत्रांचलं प्रसन्नमुखमण्डलं श्रवणसंचरत्कुण्डलम् स्फुरत्ललकबन्धुरं लपितशोभमानाधरं विहर
स्मरतिमन्दिरं व्रजति कस्यशातोदरी ॥ । कलेति शातोदरी कृशमध्या विहस्मरणमिवस्त्रीणामवगण्यकस्य महामहिमस्तकलस्मर
तिमन्दिरं क्रीडागृहं कलङ्कितामधुरध्वनिपूतामेखला कटिभूषणा यत्र चपलंचञ्चलमन्तपवचारुरमणीयं नेत्रांचलं पक्ष्म यत्र प्रसन्नमान्तरस्लो
त्रभावभूतप्रसादसहितंमुखमण्डलं मण्डलाकारंमुखं यत्र श्रवणयोः संचरन्ती कुण्डले ताटङ्के यत्र स्फुरद्भिः प्रलकैर्बन्धुरंमनोहरं यथास्यान
था यद्वा पर्वतार्यकोबन्धुरशब्दो रूपकातिशयोक्तिप्रसिद्धसाध्यवसानलक्षणया प्रकृते कुचमण्डलपरो दृष्टव्यस्तथाव स्फुरत्पुलकं बन्धुरंय
त्रकर्मणियथा भवतितथा व्रजतीगच्छतीत्यर्थः ॥ ॥ विहृतंललतयति ॥ ॥ प्रियसन्निधावभिलाषापरिपूर्णिर्विहृतम् तत्रव्याज
लज्जादयो विभावाः अनुभावाश्चान्यथाचेष्टितान्यथाव्यवहारादयः यथायथा अभिलषतिकपोलेचन्द्रचूडे विधातुंतिलकमबद्धपट
लः कोपभाजाभवान्या फणिपतिभयकूरादङ्कुपलंकम्पयन्त्याप्रचलवसनवातैर्निर्विह्निताः केलिदीपाः ॥ ॥ प्रियेति अभिलाषापरि

लविते भावितेन
शोभमानो धरोयत्र ४

अन्ने रं तोप्यम् ताहृशविघटनस्वप्नलोपधायकप्रयत्नो विहतं विहतं तत्र नु भावयतियाजान्यदकीयस्य लज्जाया: स्वकीयस्याभिलाषिन स्यदि हृद्यमिति विशेषमभिप्रेत्याह व्याजलज्जादय इति ॥२

नौका २२ सक्तेरभिलाषस्यापरिपूर्तिर्विषयासंस्पर्शस्तथा चाभिलाषफलोपधायकसामग्रीकालीनस्वप्रयत्नसंघटितताहृशसामग्रीविघटनं वि-
हतमिति फलितम् ॥ । अभिलषतीति चन्द्रचूडेशिवेति लकपत्ररचना कपोले गल्लयोर्विधातुं कर्त्तुमभिलषति वाञ्छति सममुदयस्योन्नः
विलंबावसरिकौ २३ कोपस्तदृत्या पतेनौकाएडुकोपः कम्पसहायकमाचरतीति दर्शितम् फलिपतेर्वलयीकृतमणिधराघ्रुडुयकूटमिथ्याभूतभयं तस्माद्
कूटदृसाद्यु कम्पयन्तोत्कटकम्पप्राप्त्या चरन्नाभवान्या प्रचलकम्पभाग्यहृसनमञ्चलं नसंभूतैर्नीतैः केलिदीपः क्रीडार्थस्यापि नादीपा वि-
हिताति निर्वापितात्यर्थः ॥ ॥ लज्जातो यथा आनन्दभाजो यदुनन्दनस्य करावरोधनकरेण कुर्याः संवीतपन्नीमिति संजवान चको-
रनेत्राचुलकोटकेन ॥ ॥ आनन्देति चकोरनेत्राकोपकषायितात्ती मर्थ्यप्राक्तिमूलधनेरधाञ्चुलकोटकेन षुवेसंमार्जनार्थमुपान्तेन संज- संवीतपन्नी
वान निषिषेचेत्यर्थः कथंभूतां सत्वीमानन्दभाज उत्कण्ठितस्य यदुनन्दनस्य श्रीकृष्णस्य करावरोधकंचुलिकादिनिर्मोकप्रवृत्तपाणिप्रतिब-
न्धं करेण स्वीयेन न कुर्यात् स्त्वेवमुपलम्भन्नीं शिक्षयन्तीमित्यर्थः ॥ ॥ सपरिकरं संभोगं लक्षयित्वा विप्रलम्भं लक्षयति ॥ यूनोरन्यो-
न्यंमुदितानां पञ्चेन्द्रियाणां सम्बन्धाभावो भीष्टाप्राप्तिर्वा विप्रलम्भः ॥ ॥ यूनोरिति अन्योन्यमिति प्रमोदे संबन्धाभावे चान्वेति मुदितानाम-
मिति आन्तररतिभावव्यभिचारिणो हर्षादेरनुभावैः संभृतानामित्यर्थः संबन्धाभाव इति रतिं विना ताहृशाभावो ऽतिप्रसक्त इति मुदितेत्युक्तम्
संभोगव्यावृत्त्यर्थे संबन्धाभाव इति पंचेतितरतिपरिपोषाभिप्रायम् तथा च वियोगकालावच्छिन्नापरिस्फुरणो रतिर्विप्रलम्भ इति फलितम् ।
परिपोषाभावेन शृङ्गारसामान्यलक्षणाभावान्न विप्रलम्भोपीति मन्तव्यम् ननु दोषदुष्टेन्द्रियसंबन्धकालेपि परस्परं साक्षात्काराभावेन वि-
प्रयुक्तत्वसर्वमतसिद्धं तत्संपत्तये च फलोपहितत्वसंबन्धविशेषणमावश्यकं ततो वरस्तु विषयस्फुरणानुपहितत्वमेव परिपूर्णरतिविशेष-
णमित्यभिप्रेत्य लक्षणान्तरमाह अभीष्टेति इच्छाविषयसंबन्धरहिते येवार्थात्तल्लब्धारतिर्भवत्युक्तमेव लक्षणं पर्यवसितमिति भावः ॥ ॥

अत्र त्रियकस्यांशुकस्य चेतेरकयाचित्लज्जापरवशपञ्चुलकोटकेनैव केलिप्रियकस्यारूपतेहृस्सेवविहरनं हृतमिति हर्षस्यादिशेषः ॥

यत्तु विशेष्यस्य प्रतियोगित्वं तदनायविशेष्यवतिविशिष्टाभावस्य विशेषणाभावस्वरूपत्वाभिप्रायवर्णनं न युक्तं स्फुरितत्वाभावस्य विशिष्टाभावहेतुत्वप्रदर्शनविरोधात् ॥

च्छलतो स्फुरितपदव्याहृतिं दर्शयितुं तत्र शङ्कते ॥ नचेति । नच मानात्मके विप्रलम्भेऽव्याप्तिरिति वाच्यम् स्फुरितपदेन्द्रियसंबन्धाभाव-
रूपस्य विशिष्टाभावस्य तत्रापि सत्त्वान्न दानी यूनोरिन्द्रियाणां स्फुरितत्वाभावात् न तु प्रियमभिसरति सा विप्रयुक्ता भवेदिति चेत् सत्यम्
सा विप्रयुक्तैव चिरदर्शनप्रत्याशानुदयात्प्रमोदेन विरहधर्मस्याश्रुपातादेरभाववत्ति सच विप्रलम्भः पञ्चधा देशान्तरगमनाद्गुरुनिदेशा-
दभिलाषादीर्ष्यायाः शापाच्चेति समयादेवादिहृदत्रादिस्मादयोऽप्युन्नेयाः ॥ ॥ समाधत्ते स्फुरितेति नन्विन्द्रियसंबन्धरूपप्रतियोगिम-
तिकथं तदभावोऽभावप्रतियोगिनोः परस्परं विरोधादित्याशङ्क्याह तदानीमिति तथाच न केवलं प्रतियोगिना सहाभावस्य विरोधः किं तु
प्रतियोगितावच्छेदकावच्छिन्नेनैवेत्याशयः नन्वभिसारिका न विप्रयुक्ता विप्रलम्भकार्यस्याश्रुपातादेरभावात् यथा च तत्रातिव्याप्तिरित्याश-
संभवापन्नेति २ ङ्कते नन्विति समाधत्ते सत्यमिति सा विप्रयुक्तैवेति एवकारेण स्फुरितत्वमात्रेणापादानेन नचातिव्याप्तिरितीन्द्रियसंबन्धाभावोपादानमस्ति
हास्यां चिन्तासङ्करतितदारणमिति मननमप्युक्तमिति सूचितम् नन्वेवं कुतो नाश्रुपातादिरत्यापि रत्यन्तराह प्रमोदेति विशेषानुपलम्भेऽपि
प्राचीनपरंपरानुसारेणाहं विभजते सचेति विशेषानुपलम्भेऽपि कारणवैचित्र्यमात्रेण विभिन्नभेदत्वेऽन्येऽपि बहवो भेदाः संभवन्तीति व-
क्तुमुपक्रमते समयादिरिति ॥ ॥ देशान्तरगमनेन स्वरूपसदेव विप्रलम्भहेतुः किं तु तज्ज्ञानसामान्यं तथाच देशान्तरगमनाभावेऽपि
तज्ज्ञानहेतुकं विप्रलम्भमुदाहरति ॥ ॥ देशान्तरगमनाद्यथा प्रस्थानाय कृतोद्यमे प्रियतमे दोःकङ्कणेन च्युतं धैर्येण स्खलितं म-
देन गलितं नेत्राम्भसा निःसृतम् जीवेनापि पियियासुना शिव शिव प्रारम्भि वामभ्रुवः कम्पान्दोलितकिङ्किणीकलरवव्याजेन वैतत्स्मृतिः
१ ॥ ॥ प्रस्थानायेति प्रियतमे नायके प्रस्थानाय प्रस्थानं कर्तुं कृतोद्यमे ग्रासच्चोद्योगे सति वामभ्रुवो नायिकाया दोःकङ्कणेन यद्यपि क-
ङ्कणं करभूषणमिति कोशाद्दोःपदानर्थक्यं प्रतिभाति तथापि एषां विशेषणवाचकपदसमभिव्याहारे विशिष्टवाचकं पदं विशेष्यमात्रम-

सार्थं दातिलकं कुमारवप्पकृते विपुणतागमने हृद्यै वंदिषं ५४

टीका

२४

२५

मिथुनेरतिकाव्यविदां समयात्कं कणपदं भूषणमात्रपरं द्रवं चुतं गलितं धैर्यं सखलितं त्वरापसरणान्मदेन गलितं नेत्राम्भसा निःसृतं ष्टा
नोपलवशङ्कया प्रियास्तनाग्रन्तमिछन्तजीवेनाधिकम्येत्यादिकम्येनासमन्नाहो लिताभ्यालिता याः किञ्चिल्ययः द्रुतद्रवं एटिका स्तासां यः कल
रवोऽव्यक्तमधुरध्वनिस्तद्याजेन वैण्यसृतिः प्रस्थाने वैण्यसृते मोऽङ्गलिकतयोक्तत्वात् तद्यथा वैणं यं णध्रुं हृदयमन्त्रं नं च षाकुन्तले यंभर
तं नलं च रामं च यो वै स्मरति प्रयाणे तस्यार्थसिद्धिः पुनरागमश्चेति शिवशिवेति निर्विट्वेशारत्मिम् मङ्गलमाचीर्णमित्यर्थः ॥ ॥ स्वरूपसंदे
शान्नरंगमनहेतुकं विप्रलम्भमुदाहरति ॥ यथा वातातनचरणानाम वीणामङ्के कथमपि सखी प्रार्थनाभिर्निधाय स्वैरं स्वैरं सरसिजह
शा गात्वमारब्धमेव तंत्री त्रुट्या किमपि विरहक्षीणदीनाङ्गवल्ली मे नामेव स्पृशति बहुशो मूर्छनाचित्रमेतत् १ ॥ वीणामिति सरसिज
दृशा जला विनाभूतलोचनया कयाचिन्नायिकया सखी प्रार्थनाभिः प्रियसखीविज्ञापनाभिः कथमपि बलात्कारेण वीणामङ्के निधाय स्वैरं
स्वैरं मन्दमिति विहस्ताब्दोनुगात्वमारब्धमेव मूर्छनामूर्छां किमपि तत्स्वन्ते विरहेण क्षीणाऽतएव दीनानुकम्प्याङ्गवल्ली यस्यास्तामे नामेव तन्त्री त्रु
ट्या वीणाभ्रमेण बहुशोधिकं स्पृशति विप्रलम्भोद्दीपनादेतच्चित्रं मूर्छनापदार्थस्य स्पर्शरूपधर्मस्य वीणाया मेवाभिव्यक्तेरुचितत्वादित्यर्थः ॥ ॥
गुरुनिदेशाद्यथा भास्वांश्चूततरुर्गुरुर्मनसिजः कोऽप्येष भृङ्गस्तमो मन्दो गन्धवहः सितो मलयजो दोषाकरो माधवः अक्रूरोऽ नवपल्लवः परभृ
तो विज्ञो गुरोराज्ञया निर्यातासि विचारिताः कथममी क्रूराः स्वयानग्रहाः ॥ १ ॥ भास्वानिति हे नाथ गुरोः पित्रादेराज्ञया निर्यातासि परं त्व
मी क्रूराग्रहाः दुष्टग्रहकार्यकारिणः कथं त्वया न विचारिताः कमनर्थमुत्पादयिष्यन्तीति नगणकं प्रति वचनाः अमी के ताना ह चूततरुराम्रो
भास्वान्नवपल्लवैर्दीप्तिमान्सूर्यश्च मनसिजः कामो गुरुर्महान्बृहस्पतिश्च कोऽप्यनिर्वचनीयप्रभावः एषः पुरोवर्ती भृङ्गस्तमश्चाप्यसमपादं
कत्वाद्राहुश्च गन्धवहो वायुर्मन्दपतेनो दीपकत्वाद्वेदिता शनिश्च मलयजश्चन्दनः सितो जात्या सद्यः शुक्रश्च माधवो वसन्तो दोषाणां परपी

उन्नादितनूपुरालीमाकरः स्यान्तं च चन्द्रश्च नवपल्लवोऽङ्कुरो दाहकत्वान्मङ्गलस्य परभृतः कोकिलो विनोदविशेषाभिज्ञः स्वरपतीरुन्नद्दस्य ऊहित्ति मति
तस्य विरहिजनसन्तापकारिचन्द्रावस्थानपर्यवसायित्वया मिलषितस्यामावास्यादिरूपस्यार्थस्य प्रतिपादनमुखेनेष्टचिन्तकत्वस्य स्वस्मिन्नुपयो
पनाद्दुधस्यैषमर्थः ॥ १ ॥ अभिलाषा यथा शून्यागाराभिमुखं वक्त्रं रचयतोर्वक्रीकृतग्रीवयोर्व्यस्तचोलमजानतोः क्वचिदपि व्याजात्स्तनस्ति
षतोः मार्गविस्मरतोः क्वचित्क्वचिदपि त्वकाण्डात्तरं जल्पतोः सा विभ्रेति तमावयोर्यदभवद्दूयस्तदाशास्महे १ ॥ शून्यागारेति क्वचिद्देवायत देवा
नादेः प्रहृत्तचत्वरागयोः संमर्दवशाच्चिरं विश्लिष्टयोर्द्वारभेदेन बहिर्निःसृतयोरन्योन्यमार्गावलोकनासक्तयोः कयोश्चिन्नायकयोर्मीलन नोरपव
मिदम् अग्रे गमनाशङ्कया उदेगच्छतोरप्युन्नदेवायतनमेव समुद्यस्तसंभावनयागाराभिमुखं देवालयसंमुखं वक्त्रं वदनं रचयतोरत एव व
क्रीकृतग्रीवयोस्तेनैव व्यस्तं न्यस्तं तयापि धेयविधानात्तं मे चोलमङ्गावरणवस्त्रमजानतोः क्वचिदस्थानेऽपि व्याजात्स्तनस्पर्शिपेशलोचतिष्ठतोर्मार्गं
गन्तुमध्वानं विस्मरतोः क्वचित्क्वचिदपि यत्र कुत्रापि विषयेऽकाण्डात्तरं त्वप्रवर्णं जल्पतोरावयोर्यत्सा विभ्रेतितं मध्ये मार्गं दैवसंवादितं प्रेमभर
पूरितवक्षणानिभृतपरस्परावेक्षणमभवत्तद्भूयः पुनरपि वयमाशास्महे आवामाशास्वहे इत्यर्थः ॥ अस्मदो द्वयोश्चेति नेन हि त्वविवक्षायां
मध्यः स्फुटो बहुवचनात्वशासनात् यद्यप्येकत्वविवक्षासाधारणमेव तदनुशासनं तथापि रसाभासापत्त्यानेकत्वमपि प्रकृते विवक्षामर्हती
त्यभ्युपयम् अभिनवचत्वरागस्य जनयात्राप्रसङ्गरूपवसन्तमन्वेर्वर्णेन स्यक विकुलत्वलत्वादन्यादृशाख्यानेत्वागाराभिमुखं वक्त्रं रचयतो
रित्यस्य क्वचिदपि व्याजात्स्तनस्पृशतोरित्यस्य च सामञ्जस्याभावादिति ॥ १ ॥ ईर्ष्यातो यथा प्राणेशस्य प्रभवति मनः प्रेम हेमप्रसूनं
चेतस्यूतं हगपिकमतं जीवनं बन्धुजीवम् आशास्त्रेयग्रथितमखिलं वेधसा तस्य मह्ये स्यादेतेषामपि निपतनं चाण्डिमानं विसृज्य ॥ १ ॥
प्राणेशस्येति हे च एण्डमन्तकोपनेमानमाग्रहं मुञ्चेति सख्योक्तिर्वेधसा प्रलपणः खिलं सर्वमेतदाशास्त्रेयग्रथितं प्रोतमस्याशानियतसन्ना

यथाहं त्वयि तथा त्वं मयीति प्रकाशान्ते किं विलम्बसे इति द्वयोरप्याशयस्य प्रतिपादयितुं युक्तत्वात् ४९

गा

यद्यपि विरहपदबोधितेश्च जन नायिकाविरहे श्रोहेतुकत्वाभावेपि एतत्परं भावनासंभावितेननायिकाविरहेतथा समविकल्पमितिभवन्ते बोदाहरणं तथाप्यन्यत्रे सादिना विभावनावछेदकरूपे
णविभावनाप्रश्नवाहेन तिपादनेन वियोगस्यभविष्यतीत्यनेनसंभाव्यमानहेतुकत्वप्रतिपादनेन वहुहानातोहादतरवचास्मात्तु भावात्तोत्तेयस्यापसंभवाच्चा ५

टीका २५ कथं भवतीति भावः तदेवाह नश्येति तस्माच्छापात्त्वत्प्रसङ्गेनाशेसत्ये तेषामपि निपतनं निपातः स्यादेव किं न दाह प्राणेशश्येति प
र्यन्तं कथमेवावलम्बनस्य मनः प्रेमान्तरस्तेशोहे मप्रसन्ने सत्याणि शुष्यमत्यन्तं संरक्षणीयत्वाच्चेतोऽन्तःकरणं चूतमामृत्वर्णं प्रियागमस्यानेकवि
धमनोरथशालित्वाद्भृगपिकमलपाथः सन्निमग्नत्वाज्जीवनं बन्धुजीवमस्थिरप्रसादत्वादित्यर्थः ॥ ॥ ॥ शापपरीता ग्रन्थग्रथद्दिनि
र्गन्तुमिच्छा निर्गच्छ दूरतः प्रियाविरहतापेनशापदग्धोऽभविष्यसि १ समयायाथा विश्लेषजीवनव्रीडापीडाविधुरमानसा तस्थौ प्या
तः प्रियं प्रेक्ष्य चक्रीवक्रीकृतानना १ ॥ ॥ ग्रन्थेति निर्गन्तुं पुनर्बहिर्यातुं जीवितुमितियावत् रुक्षा यदीति ग्रस्तिनदीतिशोषः दूरतो
नायिकामदृष्ट्वैव निर्गच्छ परावर्तस्वान्यत्र पतत्वान्तरे प्रियां प्रत्यभिसरणे इति यावत् प्रियेति प्रियायायो विरहस्तदीयविश्लेषस्तेन जातो
यस्तापः प्रज्वलनं तेनाऽस्मादेव तापनमात्रतमो पितस्मात्तापस्त्वन्मुखावलोकनमात्रेधः प्रवर्द्धितस्त्वत्प्रदग्धुत्तमतरस्माच्छापः शापश्च्युः
शापेनैव दग्धो भस्मसाद्भविष्यसि तथा संभाव्यसे प्रियासंभोगे यथा महापुरुषशापेन भस्मीभूतमात्मानं संभावयसि तथाहमपि प्रियाने
कट्टमात्रेणशापभूत त्वदीयविरहानलेन तथाभूतं त्वां संभावयामीत्यर्थः एतेनानुदाहरणत्वमाशङ्कमानाः परास्ताः ॥ १ ॥
विश्लेषेति । वियोगे विजीवनसंभूतव्रीडाजनितपीडया विधुरमधीरं मानसं यस्याः सा त्वया विना न जीवामीति प्रतिज्ञातत्वती कावि
त्कामिनी प्रियं विधावभ्युदिते समागमिष्यामीति दत्तसंकेतं प्रातस्तत्रोदयपर्वतङ्गतं धावितं तया । यामि विधावभ्युदिते पुनरेष्यामीतिय
दुदितं भवता जानान्त्र्यदन्तमात्रेणेदं तत्त्वेन जानातीतिवाक्येन परावर्तितं प्रातरागतं एतेन संकेतवैफल्यमुक्तं प्रेक्ष्य विफलितसंकेतं
मत्वा चक्रीवक्रीकृतानने त्येकं पदं चक्रीवच्चक्रवाकीव एतेन यथा चक्रवाके कपञ्जरे बलात्संह दितं प्रियं प्रातः प्रेक्ष्य मुखमात्रं वक्री
कृतिष्ठतितथेत्यर्थः सुखिनः वक्रीकृतमवक्रं वक्रं संपद्यते तथाकृतमाननं यया तथाभूता तस्थौ स्थितवतीत्यर्थः एतेन समयात्का

विश्लेषजीवनाभ्यां व्रीडापीडाभ्यामितिव्याख्यानं तु विश्लेषपीडयावक्रीकृते त्यस्यानन्वुणत्वाद्युपेक्ष्यम् ५

यन्तां दाम्पतिकभ्रान्ता नामिति विधुन्तनून्नप्रलपितमनादेयम् तथा सति विकुञ्चनप्रतिपादितवक्तृत्वान्वययोग्यानां चक्रवाकीविद्वलितता मूर्च्छावेगाभ्युत्तरोत्तरोदन्तरतां प्रतीत्य इमे वे स्वयं पारम्ल संगतेः
इतरासां पारलच्यप्रति विषाद विधाविरोधात उक्तः स्वार्थस्फुरत्तः शीतइति वदपुष्ठार्थता पनेत्स्व ॥
लविशेषादित्यर्थयित्वाचक्रवाकीवन्नान्ना मिश्रायेणोदाहरणंमन्यमानानां तिर्यग्विरहवर्णनानौचित्यात्मा मनस्तापो विलीयत इति मन्तव्य
म् ॥ ॥ देवाद्यथा जीवने सति विश्लेषो विश्लेषे सति जीवनम् इयोरप्यनयोर्यूनामहमेव निदर्शनम् १ दिष्ट्याद्यथा केलीगृहे वा
मणिमन्दिरे वा शशामलङ्कानगरे हुताशः इतस्ततः प्रस्थितयोर्न यूनोर्वियोगजन्मा विरराम वह्निः १ ॥ इति भानुदत्तमिश्र वि
रचितायां रसतरंगिण्यां निरूपणं नाम षष्ठस्तरङ्गः ६ ॥ जीवनइति जीवने सति विश्लेषो विश्लेषे च सति जीवनमप्यनयोर्द्वयो
र्यूनोर्मध्येऽहमेव नतु मन्निदर्शनमिति निराशस्योक्तिः केलीगृहइति लंकानगरे केलीगृहे वा गृहैकदेशे वा मणिमन्दिरे वा गृहस्य सर्वभागे
वा प्रज्वालितो हुताशोऽग्निः शशाम कियता कालेन शान्तो बभूवेतस्ततोऽयथा निर्गमं प्रस्थितयोः पलायितयोर्यूनोः पुमान्स्त्रियेत्येकशेषः ।
वियोगजन्मा विरहोद्दीपितो वह्निर्वह्निस्तुन विरराम भयातिपातेन चिरादप्यपरावर्त्तनादिति भावः ॥ ॥ इतिश्रीजगन्नाथकृतं ।
रामरचिता नौकाख्यायां रसतरंगिणी व्याख्यायां षष्ठस्तरङ्गः ६ ॥ ॥ श्रीगणेशाय नमः ॥ ओम् ॥ ओम् ॥
हास्यं लक्षयति ॥ हासस्य परिपोषो हास्यः वर्णोऽस्य शुभ्रः दैवतं प्रमथः स च द्विविधः स्वनिष्ठः परनिष्ठश्चेति तावप्युत्तममध्यमाध
माभेदात्त्रिधेति षड्विधः ॥ १ ॥ हासस्येति शुभ्रवर्णं दर्शयति शुभ्रइति दैवतं दर्शयति प्रमथइति एवमग्रेऽपि तं विभजते स चेति स्व
निष्ठइति स्वाश्रयात्मालंबनं तन्निष्ठम् तदुक्तम् यात्मस्थो दृष्टरूपस्तेनाविभाव्यमानात्मा ततः अत्र मात्रपदेन स्वाश्रयात्मालम्बनत्वं दर्शितम्
परनिष्ठइति स्वाश्रयालम्बनत्वेतरनिष्ठम् तदुक्तम् हसन्तमपरं दृष्ट्वा विभावश्चोपजायते योऽसौ हास्यरसस्तज्ज्ञैः परस्थः परिकीर्त्तितः अत्रप्रथ
मपादेन स्वाश्रयालंबनत्वं दर्शितम् न चैवं स्वनिष्ठरत्यादिसमाख्याविरोधइति वाच्यम् स्वस्मिन्हासाधिकरणे निष्ठा साधिकरणता मात्रं य।

नै॰ का॰
१६
२८

स्वस्मर्यात् एवं परस्मिन्हासानधिकरणेपि निष्ठालम्बनत्वं यस्येत्यर्थात् इदं च वैकृत्याद्युपाधीनामालम्बनत्वाद्विभावपदमुख्येत्वाभिप्रायेण
विकृताद्युपाधेयानां तथात्वमिति सिद्धान्ते तु तत्त्वेण त्वावश्यकत्वे द्रष्टुर्विकृतस्य विभावलक्षणमात्रतः विकृतविभावताप्रयोजकविकारूपो
पाधिज्ञानादेवेमपेक्षणमत्वकवाक्यस्यैवार्थः कार्यः स्वनिष्ठपरनिष्ठपदे तु विकृता विकृतत्वालम्बनकरूपयथाश्रुतार्थकपदेवेति न सन्दर्भविरोध इ
तिमन्तव्यम् तावपि स्वनिष्ठपरनिष्ठावपि ॥ ॥ स्वनिष्ठोपि षड्विधः परनिष्ठोपि षड्विध इति द्वादशविधो हास्यः तथाहि उत्तमानां स्व
निष्ठे परनिष्ठे च स्मितहसिते मध्यमानां स्वनिष्ठे परनिष्ठे च विहसितोपहसिते अधमानां स्वनिष्ठे परनिष्ठे चाऽपहसितातिहसिते उत्तमानामी
षद्विकसितकपोलमलक्ष्यदशनमपाङ्गसङ्कुचितवीक्षणं स्मितम् उत्फुल्लकपोलं किञ्चिल्लक्षितदशनं हसितम् मध्यमानां समयोचितमुत्तमस्व
नमाकुञ्चितमुखमाविर्भूतवदनरागं विहसितं प्रफुल्लनासापुटं कुटिलवीक्षितं कुञ्चितग्रीवं स्फुरत्स्कन्धमुपहसितम् अधमानामनुचितमुपद
श्रुकम्पितमौलिस्फुटतरस्वनमपहसितम् अस्थाने बहुलाश्रुस्फुटतरस्वनमाक्षिप्तपार्श्वजनमाकृष्टकर्णमतिहसितम् ॥ ॥ उत्तमानां स्वनि
ष्ठः परनिष्ठश्च हास्यः स्मितहसितभेदेन द्विविधः एवं मध्यमानां स्वनिष्ठः परनिष्ठश्च हास्यो विहसितोपहसितभेदेन द्विविधः एवमधमानां
स्वनिष्ठः परनिष्ठश्च हास्योऽपहसितातिहसितभेदेन द्विविध इति द्वादशविधो हास्य इति विवक्षापक्रमते । स्वनिष्ठोपीति । तदेवोपपादयति
तथाहीति स्मितं लक्षयति ईषदिति तदुक्तम् ईषत्फुल्लकपोलाभ्यां कटाक्षैरप्यनुल्बणैः अदृश्यदशनो हास्यो मधुरः स्मितमुच्यत इति हसि
तं लक्षयति उत्फुल्लकपोलमिति तदुक्तम् वक्त्रनेत्रकपोलैश्च उत्फुल्लैरुपलक्षितः किञ्चिल्लक्षितदन्तश्च हास्यो हसितमिष्यत इति विहसितं ल
क्षयति समयोचितमिति तदुक्तम् सशब्दं मधुरं कालागतं वदनरागकृत् आकुञ्चिताक्षि वदनं विदुर्विहसितं बुधा इति उपहसितं लक्षयति उ

नतंकपोलविका
सत्रतिवंधकचेष्टा
वदानंतथसकपो
लविकासमतितं
धकं ८
संभाव्यं

उत्फुल्लनासापुटमिति तदुक्तम् निकुञ्चितांसशीर्षश्च जिह्मदृष्टिविलोकनः उत्फुल्लनासिको हास्यो नाम्नोपहसितं मतमिति अपह।
सितं लक्षयति अहतमिति तदुक्तम् अस्थानजः साश्रुदृष्टिराकम्पस्कन्धमूर्द्धजः शार्ङ्गदेवेन गदितो हास्योपहसिताह्वय इति अतिह।
सितं लक्षयति असहतमिति तदुक्तम् स्थूलकर्णकटुध्वानो बाष्पपूरप्लुतेक्षणः करोपगूढपार्श्वश्च हास्योतिहसितं मतमिति ॥ ॥
स्वनिष्ठं हसितं यथा लेखनीमितस्ततो विलोकयन्कुत्रकुत्र न जगाम पद्मभूः तां पुनः श्रवणसीम्नि लम्बितां प्राप्य सन्नतमुखः स्मितं दधौ १।
स्वनिष्ठहसितं यथा रोमाङ्कुरं व्योमगतं रदायमुग्रद्युतिस्वीयमुदीक्ष्य विष्णोः यदा सहास्यं किमु तत्पयोधावद्यापि फेनस्तवकायमानम् १।
॥ लेखनीमिति पद्मभूर्ब्रह्मा लेखनीमितस्ततो भयोरपि पार्श्वयोर्विलोकयन्कुत्र कुत्र न जगाम किं किं न ददर्श श्रवणसीम्नि लम्बितामवतंसी
कृतां तां पुनः प्राप्य नतमुखः सन् लज्जानमिताननः सन् स्मितं दधौ अत्र व्यञ्जकतावच्छेदकवैजात्यान्मुक्तिरन्यापि स्मितादिपदानि वक्तव्यस्वतावच्छे।
दकानि वमन्ति तथा तथाविधलेखनीदर्शनगतहास्यालम्बनं न चासौ स्वाश्रयरसुदाहरणसङ्गतिः । रोमाङ्कुरमिति उग्रद्युति प्रकीर्णका।
न्निस्वीयं वैष्णवं व्योमगतं एष्यदुद्धा रेगगनतलदृष्टं रोमाङ्कुरं केसरमुदीक्ष्य विष्णोर्यद्धास्यमासत्तस्माद्धास्यात्पयोधौ क्षीरार्णवे यापीदानीम
पिफेनस्तवकायमानं पुञ्जीभूतफेनरूपतया परिदृश्यमानं रदायं किस्वित्यर्थः अत्रैतेषां हसितोदाहरणतामभिव्यनक्ति ॥ ॥ एको
क्तैव परनिष्ठमेतद्द्वयमुदाहरति ॥ परनिष्ठं स्मितं हसितं च यथा हरवृषभमुखे सखेलमायोजयति सुवर्णसवर्णकान्तिपर्णम्
हरिभुजगपतेः शिशुः षडास्यः कलयति कज्जलमन्तिके भवान्याः १ परनिष्ठं विहसितं यथा निशास्त्वै तैलस्य धियाग्रहीत्तैर्मणीजलेर्लि।

अत्रापि स्वेल मित्युपपन्ते तेन लक्षणलक्षितत्वावगमः ३

नै० का०
२
२७

नमुखारविन्दम् गोपं प्रभाते स्खलदश्रुनीरमधीरनादं जहसुस्तरुण्यः १ ॥ हरेति षडास्यः शिशुः स्वामिकार्त्तिको हरचूड

भमुखेन नन्द्यास्येन स्ववर्णेत्यादि स्ववर्णेन सवर्णाः समानवर्णकान्निर्यस्य तन्मर्मे भवान्यास्त्रिके समन्तं सखेलं सकौतुकं यथा स्यात्तथा

योजयत्स्थापनयति भुजगपतेः शेषस्य हर्षिकज्जलं कलयति द्रष्टव्यर्थः अत्रवर्णव्यापारेण हसन्नं षडास्यं हष्ट्वा भवान्याः स्मितमभूद

ज्ञन व्यापारेण हसन्नं तं दृष्ट्वा तस्या हसितमाविर्भूवे त्यर्थो हि भावेवे चित्रमात्रागता दुद्दाहरणसङ्गतिः परनिष्ठोदाहरणे चैवं स्वनि

ष्ठदाहृतो भवति स्वाश्रयालम्बनत्वस्य तल्लक्षणत्वादित्याशयेन तमेवभेदमुदाहरति निशास्विति तरुण्यो निशास्वैते लस्य धियागृ

हीते मर्षी जस्तैलिनमुखारविन्दं गोपं प्रभाते स्खलदश्रुनीरं निःपतद्बाष्पजलमधीरनादं प्रबलक्रकणध्वनिचयथा भवति तथा जहसु

सूत्रं दृष्ट्वा ...ना रनिष्ठितः ४

र्हसितवत्यस्त्वर्थः ४ ॥ ॥ परनिष्ठमुपहसितं यथा योनिरोधोमयास्त्वरतिपद्यं पुरन्ध्रुपः शम्भुद्रक्तल्लनासेन तदस्येनोपहस्यते

परनिष्ठमपहसितं यथा रत्नोत्सवे वल्लभयज्ञसूत्रं कण्ठावलम्बं परिमोचयन्ती द्विजाङ्गनादीर्घतरं स्वसन्ती तारस्वनं वारवधूर्जहास १०

रतिष्ठमतिहसितं यथा चौरः कामरिपोर्गृहं निशि गतः शूलं कपालं हरन्बीजं धन्वफलस्य तण्डुलधियानीत्वा पुनर्भक्षवान् यावल्लाय

चलस्खलन्पतितपनमुष्टिभ्रं चूर्णं हसन्न्हदध्वनिश्चक्रमौलिकसमं सर्वेश्यया हस्यते १ ॥ ॥ यदिति मयायद्वाग्रस्यारत्वर

इतिः

ति तात्पर्यकं पद्यं यो निरोधं पदद्योतितवाक्यं पदन्युधीयोनेरो यद इति जनमुषितार्थप्रतिपादकं मत्वा शम्भुर्दिव्यादिनिरन्तरेषु सभरोक्तन

नासापुटेन तदस्येनोपहस्यतेत्यर्थः रत्नोत्सवरति वारवधूवैश्यारतोत्सवे केलिवेलायां कण्ठावलम्बं वल्लभयज्ञसूत्रमुपवीतं द्वी

सूत्रवातं बन्नोद्दीपनात्सूयाणां त्रया
णामपि प्रतीतिरिति विशेषः नवि
हं कियोविशिनष्टि दीर्घतरमिति

अत्र त्वेकत्वाविवक्षया प्राग्वद्दृष्टश्रुतस्वात्मेपादुत्तरवदेवा परनिष्ठत्वमवगन्तव्यम् ५

हेतरेखसन्नीसितीपरिमोचयन्नीको विद्धिजांगनां ब्रह्मणवक्षस्तुरतश्रमसंभवमधिकस्थासस्तुपवीतपरिमोचनश्रमसंभवतयाप्रतिपादय
न्नीतारस्तनस्त्रैर्ध्वं यथा तथा जहास हसति स्मेत्यर्थः चौर इति सर्वस्वपयाःपूरे मितिनिशिकामरिपोः शिवस्य गृहं गतःसूलेकपालेचर
रन्धूर्तफलस्य धत्तूरफलस्य बीजं तण्डुलधियानीत्वा पुनस्त्यस्येभुक्तवान् अत एव धातुवलान्नान्दोलितःसन् चलत्यावनस्वलनरुद्धचरणः
सन् पतितं स्वगम्भूरान्विस्मृतारम्भः सन्निहूर्णान्विचित्रो भवन् सन्निरालम्बं हास्यं कुर्वन् चौरो हाहृध्वनिनिर्भक्तकण्ठस्तु क्रमौलिकस्त्वमं
निपतन्निहरोस्मितत्रुष्य चयथास्यात्तथा हस्यते हासास्यदीक्रियतेत्यर्थः ४॥ ॥ करुणं लक्षयति ॥ शोकस्य परिपोषः करुणः
स्पृशा विशिष्टे सति सर्वेन्द्रियक्षोभो वा । नच विप्रलम्भेऽतिव्याप्तिः तत्रेच्छायाः सत्वात् तद्विच्छेदे तु स विप्रलम्भः करुण एव शोकोद्भवः स्त्व
म् वल्लभस्य कपोतचित्रितो दैवतं करुणः सच स्वनिष्ठः परनिष्ठश्च स्वस्यापवन्धनक्लेशान् निष्ठैर्विभावैः स्वनिष्ठः परेष्टनाशापवन्धनक्ले
शादीनां दर्शनस्मरणैर्विभावैः परनिष्ठः ॥ शोकस्येति परिपोषोभ्यावरणचिह्नैरिष्टनाशविनिगमना विरहाच्छोकावच्छिन्नभग्ना
तो वरणचित्रैः पिकरुणत्वे शोकासाधारणकार्यीभूतसर्वेन्द्रियक्षमस्याप्यवच्छेदकत्वविनिगमकाभावेनानीयमानमतिचार्येमित्यन्त
तःकरुणत्वेरपितथात्वमभिधत्ते सर्वेन्द्रियेति अत एव शोकाद्याकारोऽपि रसस्य चकः एतदभिप्रायेणैव चादावुक्तं रलक्षणे विप्रलं
भातिप्रसङ्गमपसार्य प्रथमलक्षणं च विशिष्य शोकपदमनन्तरं व्याख्यातमेवं चोत्तरत्रापि वैकल्पिकपक्षान्तरसमुपन्यासो व्याख्येयः अत्र
वन्धनाद्युपाधीनां शोकविभावत्वेन समानाश्रयालम्बनत्वं स्वनिष्ठत्वं स्व अधिकरणालम्बनत्वं च परनिष्ठत्वम् बन्धनकर्मीभूताद्युप
धेयानां तथात्वमिति सिद्धान्ते तस्याश्रयालम्बनत्वं स्वनिष्ठत्वं स्वाश्रयान्यालम्बनत्वं च परनिष्ठत्वं वाच्यम् नचैवं बन्धनाद्यसनादि तिम

नौका २८ 28 रत्नाचार्योक्तिर्विरुद्धेतरतिवाच्यम् बध्यमानस्यापि बन्धनेनैव विना न करुणविभावत्वमित्यर्थे धननायैव तथोक्तेरेवं सर्वत्र विभावेरी-
तिरनुसर्तव्या तदुक्तं मम रहमहैश्वर्यान्नादयो विभावा इतीयमभिप्रेत्याह स्वशापेति परेष्टनाशेति च ॥ ॥ स्वनिष्ठो यथा तव नाथ
शरःशरासनासनं तव देहेन सहैव भस्मसात् अहमस्मि न ततः प्रतीयते तव नास्मीति किमुच्यतामितः १ परनिष्ठो यथा अनुवनम
नुयान्तं वाष्पवारि प्रजन्तं म्हदितकमलदाम सत्तामनालोच्य रामम् दिनमपि रविरोचिस्तापमन्तुः प्रसक्ते रजनिरपि च धत्ते तारकावाष्प
बिन्दून् १ ॥ तवेति हे नाथ तव वाम्लविकसद्भ्यासम्बन्धभाक् शरःशरासनं वा तव देहेन सहैव योगपद्याऽयोगमवच्छेद १-
वकारार्थः भस्मसाद् भस्मीभूतमपि देहमस्मि न त्वं भस्मीभूता ततो भस्मीभावाभावात् तव नास्मि त्वदीयसम्बन्धभाक् न भवामीति प्रतीयते
अतित्यते इत एवंविधनिश्चयानन्तरं किमुच्यतां मां विहाय कथं परलोकपथिको भूरिति किं वक्तव्यमित्यर्थः ॥ अनुवनमिति वन १-
मालद्याः अनुयान्तं वाष्पवारि प्रजन्तं म्हदितेत्यादि म्लानसरोजमालाकृशां राममनालोच्यादिनमपि स्थितं न सन्तापकं स्पुसमाह रवीति सो-
रप्रचण्डातपलक्षणं तापमान्निज्वरमन्नुर्मध्येऽहं रसमर्थ्या प्रसक्ते प्रकटयति रजनिरपि च तारकेति तारकाः नक्षत्राण्येवा वाष्पबिन्दून् धत्ते प्र-
कातीत्यर्थः ॥ ॥ परिपूर्णः क्रोधो रौद्रः सर्वेन्द्रियाणामौद्धत्यं वा वर्णोऽस्य रक्तो दैवतं रुद्रः यथा चलद्भुजः किं न चक्रं भुजगपति-
रसो वर्मनेत्र वा न पाशः कृत्ताः किं दन्ति दन्ता न च गिरिशपाणिः किन्नु शस्त्रैः किमन्यैः भीमोऽहं दुष्टदुर्योधननिधनसमुद्दण्डबाहुप्रकाण्डः १-
प्रभावेत्र प्रकोपप्रलयद्रुतवहो नास्मि कस्यापि वध्यः १ ॥ ॥ रौद्रं लक्षयति परिपूर्ण इति प्राग्व्याख्यातमुल्लक्षणान्तरमाह स १-
वेन्द्रियाणामिति व्याख्यातं तन्त्रमेतत् वर्णोऽस्य रक्तो दैवतं रुद्र इति ननु दैवतयाभेदाध्यवसायान्तदीयवर्णेन रसे वर्णाध्यवसाय

वस्तुतत्वज्ञः पदसमभिव्याहृततापपदमेव ज्वररूपकपरमित्यलं क्लिष्टकल्पनया ४

तिप्रागुक्तम् रुद्रस्य कर्पूरधवलो वर्णः स्मर्यते तत्कथं रौद्रस्य वर्णो रक्त इति चेत् सत्यम् यादृशान्तःकरणवृत्तिकाले यो देवतायां वर्णो-
ऽनुभूयते तेन वर्णेन रसस्य वर्णो वक्तव्यत्वेन व्यवसीयते तथा च क्रोधाविष्टस्य रुद्रस्यापि वर्णो रक्तो भवतीति सकलानुभवसंवादि प्रमाणमूल-
कत्वं तावदस्य प्रामाण्यात् स्मर्यते च कोपेन चास्य वदनं मषीवर्णमभूदिति क्रोधसमावेशे वदनं लोहितं स्यात् देवतायामपि मषी-
गुणेनेति भाषितेति नानुपपन्नो ग्रन्थोऽपि चण्डांशुरिति चण्डांशुः सूर्यस्तत्कः किन्नरमेवं रूपया का कोदरमेव सत्सलभं च क्रमिति विपरीता-
र्थो गम्यते एवमग्रेऽपि असौ धराधरो भुजगपतिः शेषः पाशो वा न वर्तते दन्तिदन्ताः किं कुन्ताः कुन्तायुधानि न गिरिरश्मानि किं न अग्रे-
रेतद्व्यतिरिक्तैः शस्त्रैः किं अलं अहं भीमो न त्वसाधारणकर्मा दुष्टेति दुष्टस्य दुर्योधनस्य मारणार्थं सम्यग्व्रतीकृतो दण्डो यत्र तादृ-
शो बाहुप्रकाण्डो भुजरूपावयवो यस्य तादृशः प्रत्यासन्नेति पुनरुद्दीप्तः प्रकोप एव प्रलयकालिकाग्निर्यस्य तादृशः कस्यापि वशो धीनो-
नासीत् सर्वथैः न त्वत्रास्य क्रोधस्य प्रकोपपदेन वाच्यीकरणे दोषात् कथं रसोदाहरणमिति चेन्निरवधानोऽसि रसदोषे रसानामवाच्या-
त्वस्य कृतत्वादुदाहरणतायामदते ॥ ॥ तदिमं दोषमसहमान उदाहरणान्तरमाह जी॥ यथा वा क्रीडत्कुरङ्गतरङ्गदापपटली
खर्वीकृतो वीधरश्रेणीस्फूर्जितभ्रूविधोरणि तमस्तोमावली हं जगत् बहुस्पर्द्धकरीन्द्रवृन्दचरणव्याघ्नभोगीश्वरव्याग्रोदयफणाग्र
